नचविषेणशक्य जीविताध्यवरोपयितुं । तत्कथमिति । यदा महाब्राम्हण सूर्पारके महानगरवरे कोशवलिकस्यश्रेष्ठिनः पुत्रो विद्यावादिको वभूव । तेन विद्यावलेन तक्षको नागराज आकर्षितः । आकर्षयित्त्वाच प्रमाद वशाद्धद्धःनदान्तो यावत्तेनासौ महाक्रोधा दृष्टः । सतीव्रां खरां कटुकां वेदनां वेदयति । जानाति च यथा मे जीवितं विषेणनिरुद्धमिति । तत्रबहबो विद्या वादिका आह्वताः । नचकश्चिद्विषशक्नोति चिकित्सितुं । अथ तत्रैव सूर्पारके महानगरवरे विमल विशुद्धिर्नामोपासिका प्रतिवतिस्म । सा महाकरुणासमन्वागता । तस्या इयं महाविद्याराज्ञी मुखाग्रे भूत् । सातस्यान्तिकमुपसंक्रान्ता उपसंक्रम्य इमां महाविद्यां प्रवर्तयामास । तस्यामेववेलायां मनुस्मृतमात्रायां निर्विषंस्मृति प्रतिलब्धंकृत्वा

ततो महाव्यसनात्परिमोचयित्वा इमांमेव महाविद्यां श्रेष्ठिपुत्र हृदयगतांकृत्वा यथाविधिवदनुज्ञानमिति । २ ।

अपि च महाब्राम्हण किंपरिज्ञानमिति । यदा वाराणस्यां महानगरर्यामनुपूर्वेणा विचरमाणो राजा ब्रम्हदत्त इति संज्ञां गच्छति । तस्य प्रातिसीमिको वल चक्रवर्तिराजा चतुरंगबलकायं संन्नाहृय वाराणसी महानगरी परिवार्य विनाश–यितुमारब्धवान् । ततोराज्ञो ब्रम्हदत्तस्यमात्यैर्निवेदितं । देव परचक्रेण नगर–मपहृतं । तत् किंनुखलु वयमुपायं कुर्यामोयेन तत्परचक्रं विनश्येत् ।आज्ञां प्रयच्छ । राजा कथयति । अल्पोत्सुकाभवन्तः । अस्ति मम महाप्रतिसरा नाम विद्याराज्ञी ययैतमिमं चतुरंग बलकायं पराजयिष्यामि भस्मीकरिष्यामि च । अमात्याः शिरसा प्रणिपत्योचुः । किमिदं महाराजनास्माभिः कदाचिदपिश्रुतमिति । राजा–प्राहः अहमिदानी प्रत्यक्षदर्शनं करिष्यामि । अथ स राजा ब्रम्हदत्तो नानागन्धोदकेन स्नात शिरः श्रुचिवस्त्रं प्रावृत्य महाप्रतिसरां महाविद्याराज्ञी यथाविधिनाभिलिख्य शिरः कोशे स्थापयित्वा इमामेव विद्याराज्ञी कवचं कृत्वा संग्राममध्येऽवतीय एकाकिनैव सर्वासौ चतुरंगो वलकायः पराजितोऽवमर्दितश्च । तावदनयावच्छ–रणंगतः इति कृत्वासौ वलचक्रवर्ति राजा मुक्त इति ॥ ३ ॥

महाब्राम्हण प्रत्यक्षानुभावेयं महाविद्याराज्ञी सर्वतथागत हृदयमुद्राधिष्ठिता प्रत्यक्षेति धारयितव्या । सर्वतथागतसमैषाद्रष्टव्या पश्चिमे समये अल्पायुष्कानां मन्दपुण्यानां मन्द भाग्यानां परीत्त भाग्यानामर्थाय हितकामाय सुखाय द्रष्टव्या । यः कश्चिन्महाब्राम्हण इमां महाप्रतिसरां महाविद्याराज्ञीं यथाविधिना लिखित्वा वाहौ कण्ठे वा धारयिष्यति । ससर्वतथागताधिष्ठितो वेदितव्यः । ससर्वतथागत इति वेदितब्यः । स वज्रकाय इति वेदितव्यः । स सर्वतथागत धातुगर्भ इति वेदितव्यः । स सर्वतथागत नेत्र इति वेदितव्यः । सज्वलितार्चिः शरीर इति वेदितव्यः । सोऽभेद्य कवच इति वेदितव्यः । स सर्वशत्रुप्रमर्दक इति वेदितव्यः । स सर्वपापावरण निर्दहन इति वेदितव्यः । स सर्वतथागत विशोधन इति वेदितव्यः ॥ ४ ॥

किमिति पूर्व परिज्ञातं महाब्राम्हण अन्यस्मिन् प्रदेशे भिक्षुरश्राद्धस्तथागत कुलशिक्षा खण्डकः । अदत्तादायी यथासुखं सुखायोद्धार हारितः । सांघिक चातुर्दिशिकं गणप्राप्तं यद् द्रब्यं तत्यौद्गलिक कृत्वा सर्वमधिष्ठाय भक्षयति। यावद परेणकालसमयेन महता व्याधिना स्पृष्टो महती दुःखा तीब्रां खरां कटुकां वेदुनामनुभवति। सतपस्वी अत्राणोऽपरायणोऽप्रतिशरणो महान्तमुत्क्रोशना शब्दमकरोत् ॥ ५ ॥

अथ तस्मिन्नेव पृथिवीप्रदेशे उपासको ब्राम्हणः प्रतिवसति। तेन तच्छब्दःश्रुतः श्रुत्वा च पुनर्येन सभिक्षुस्तेनोपसंक्रान्तः। उपसंक्रम्य तस्य भिक्षोरिमां महाप्रतिसरां महाविद्याराज्ञीं लिखित्वा कण्ठेवन्धातिस्म। समनन्तरबद्धायांच महाप्रतिसरायां महाविद्याराज्ञां तस्यभिक्षोः सर्वावेदनाः प्रशान्ताः सवब्याधिभिश्च परिमुक्तः स्वस्थः संवृत इति। तस्या एवं रात्र्या अत्ययात्सूपस्थितं स्मृतिः कालगतः ॥ ६ ॥

स तस्मिन् कडेबरे उत्सृष्टेऽवीचौ महानरके उपपन्नः । तत्र तस्य मृतशरीरं भिक्षुभि कूटे स्थापितं। सा च तस्य महाप्रतिसरा महाविद्याराज्ञी कण्ठेवद्धै वाव-स्थिता । समनन्तरोपपन्नस्य च तस्य भिक्षोस्तस्मिन्नवीचौ महानरके । तेषां नारकानां सत्त्वानां सर्वादुःखवेदना प्रशान्तास्ते च नारकाः सत्तः सर्वसुखसमर्पिता अभूवन् ये च ते महान्तोऽवीचिकाग्नि स्कन्धास्तेऽपि सर्वेण सर्व मुपशान्ता इति॥ ७॥

अथ ते यमपुरुषाविस्मयमापन्ना यमस्य धर्मराजस्येमं निश्चयं विस्तरेणा रोचयन्तिस्मः । अति विस्मयमिदं देव दृश्यते नरकसंकटे । प्रशान्ता दारुणा दुःखा सत्त्वानां कर्मजाश्चये। प्रशान्तास्तेपि चाङ्गारा देहस्था देहिनां सदा। कर पत्रा न बाधन्ते क्षुरुधारा न सज्जते । अथः शाल्मलयो भग्नाः प्रशान्ताः लोहकुंभयः। असिपत्रले पत्रा न बाधन्ते कर्मजाः पुनः । यमस्त्वं धर्मराजोऽसि धर्मेणशासय प्रजाः । इदंतु कारणं नाल्पमस्माकं वक्तुमर्हसि ॥ ८ ॥

ततोसौ धर्मराजावै धर्मात्मा धर्मनिश्चयः। करुणाशयनष्ठानां वाक्यं श्रुत्वेदम-ब्रवीत्। किमेतत्कथ्यतां शीघ्रं कथमेतत्प्रवर्तितं ॥ ९ ॥

ततस्ते दुष्टसन्तानां यमभृत्याः सदारुणाः। यमस्य धर्मराजस्य इदं वचनम-ब्रुवन्। अयं देवमहासत्त्व उत्पन्नोनरकसंकटे। अवीचिर्यस्य नामेदं तेनासौ संकट उच्यते। कर्मणा यस्य वैचित्र्यं सत्त्वा येन सुखीकृताः। सुखितोह्येष सर्वत्रपुनर्याति सुरालयं ॥ १० ॥

यमोपि धर्मराजावै दृष्ट्वा वदति विस्मितः। महर्द्धिको महच्चास्य शरीरं पौर्वजन्मिकं। यथाधातुशतैर्वृन्दैः स्तूपं शोभतिशास्तुनः। तथास्य शोभते कायः प्रतिसरा बद्धकण्ठकः ॥ ११ ॥

अथ ते नरक पाला यक्षा यमस्य धर्मराजस्य इदं वचनमद्रुवन्। कथमियंदेव प्रतिसरेत्युच्यते धर्मराज उवाच ॥ १२ ॥

प्रतिपत्स्मारयेद्यस्तु स न गच्छन्ति दुर्गति।
सुगर्तियात्यसौ नित्यं प्रतिसरा भावभावितः।
यूयं नरकपालावै गच्छत पुष्करावती।
तद्द्रक्ष्यथ महाकुटं देवतैः परिवारितं।
तं दृष्ट्वा सर्वसत्त्वेषु मैत्रचित्ता भविष्यथ ॥ १३ ॥

अथ ते यमपुरुषा यमस्य धर्मराजस्याज्ञया तस्यामेव रात्र्या पुष्करावती गताः। ते पश्यन्ति तदा तत्र राजधानी समीपतः। तच्चकूटं समन्तेन एक-ज्वालासमाकुलं। मृतशरीरं पश्यन्ति प्रतिसरावद्धकण्ठकं। देवनागाश्च गन्धर्वायक्ष-राक्षसकिन्नराः परिवार्य समन्तेन पूजां कुर्वन्त्यनुत्तरां यावत्तस्यतैर्यक्षैः प्रतिसरा-कूटमितिनामस्थापितम् ॥ १४ ॥

अथ ते यक्षाः पुनरागत्य यमस्यधर्नराजस्य इमं निश्चयंविस्तरेणा रोचयन्तिस्मः। एवमेतदेव यथात्वयाभिहितं। समनन्तर रोचितेस्मिं च वचनपर्यावसाने समहासत्त्वस्तंनारकं शरीरं विजस्य त्रयस्त्रिंशेषुदेवेषूपपन्नः। तेन हेतुनाप्रतिसरा पूर्वी देवपुत्र इत्युच्यते ॥ १५ ॥

तेनहि महाब्राम्हण परिज्ञातपूर्व तस्मा देवश्यमेवेयं महाप्रतिसरा धारयितव्या वाचयितव्या लिखितव्या लिखापयितव्या यथाविधिनानित्य शरीरगतांकृत्वा धारयितव्या ससर्वव्यसन दुखेभ्यः परिमुच्यते। सर्वदुर्गति भयभैरवेभ्यः उत्तरति। यावदष्टाक्षणेभ्यः परिमुच्यते। न च विद्युताशक्यं पातयितुं ॥ १६ ॥

किमिति विद्युता परिज्ञात पूर्व महाब्राम्हण हिंगुमर्दने महानगरवरे विंमलशंखोनाम श्रेष्ठि प्रतिवसति। स महाधन कनकसमृद्धः परिपूर्णकोषकोष्ठागार सम्पन्नो बभूव। स महासार्थवाह इतिख्यात्वान्। अथ स महासार्थवाहो यान पात्रमासाद्य महासमुद्रमवतीर्णः। यावत्तिमिंगिलैः सोस्यपोतो वष्टब्धः। विनाशयितु कामानागाश्च संक्षुब्धाः महान्तं गर्जनास्फोटं कुर्वन्ति। विद्युदुल्कामुत्सृजन्ति। वज्राशनिं प्रवर्षयितुमारब्धाः ॥ १७ ॥

ततस्ते वणिजो महतो दुःखेना व्याहतचित्तास्तमहान्तंनागसंक्षोभंवीद्यूदुल्कावज्राशनिचोत्सृजन्तं। तैश्च तिमिंगिलैस्तत्पोतमवस्तब्धं दृष्ट्वा महांतमुत्क्रोशना शब्दंकर्तुमारब्धाः। ते देवताविशेषान् याचयन्ति न च कश्चित्तेषां परित्राताभवन्ति। ततस्ते वणिजः सार्थबाहस्योपगम्य करुण करुणमिदंवचनमब्रुवन्। परित्रायस्व महासत्त्व मोचयास्मान् महाभयात् ॥ १८ ॥

अथ खलु महासार्थबाहो दृढ चित्तो महामतिः। वणिजो विक्लवीभूतानिदं वचनमव्रवीत्। माभीर्माभी वणिजो भवन्तो धीरतां ब्रज। अहंवो मोचयिष्यामि अतोदुःखामहार्णवात् ॥ १९ ॥

ततो धीर मनसो भूत्वा इदंवचनमब्रुवन्। किमेवैतत्महासत्त्व ब्रूहि शीघ्रमविघ्नतः। यावज्जीवितमस्माकं त्वत्प्रभान्महामते। कथ्यतां ज्ञानमाहात्म्यं पश्चात्त्वं किंकरिष्यसि॥ २०॥

ततः सार्थपतिस्तेषामिमां विद्यामुदाहरन्। अस्ति मम महाविद्या प्रतिसरा नामविश्रुता। दमनी सर्वदुष्टानां महावल पराक्रमा। अतोऽहं मोचयिष्यामि अतीदुःखा महाभयात्। ततः स सार्थवाहस्तस्यां वेलायामिमां महाप्रतिसारं। महाविद्याराज्ञीं लिखित्वा ध्वजाग्रावरोपितां कृत्वा धारयतिस्म। समनन्तरं ध्वजाग्रावरोपिताया मस्या महाप्रतिसरायां महाविद्याराज्ञां। सर्वे तिमिंगिला स्तेतत्पोतकमेकज्वालीभूतं पश्यन्तिस्म। ततस्ते नागा मैत्रमनस स्तेनामन्तिके अवतीर्य पूजां कर्तुमारब्धः। तेचतिमिंगिला अस्या प्रतिसराया महाविद्याराज्ञा अनुभावेन दह्यमानाः परायिता विलयं गताः। ते च महासार्थिकाः तैर्महानागैर्महति महारत्न द्वीपे प्रापिता इति॥ २१॥

ज्ञानवतीयं महाविद्या महाप्रतिसरा सर्वतथागताधिष्ठिता। तेन हेतुना महाब्राम्हण महाविद्येतिख्याता। तस्मादवश्यमेवेयं ध्वजाग्रावरोपितां कृत्वा धारयितव्या वाचयितव्या। सर्ववात शीताकाल मेघविद्युदर्शनी प्रशमयति। सर्वदेव मनुस्यामनुष्यः विग्रह विवादेभ्यः परिमोचयति। सर्वदंशक शलभ प्राणक जातिका विविधरुपाः शस्यविनाशका नप्रभवन्ति प्रशमं गच्छन्ति। सर्वेच दुष्टचित्ता मृगपक्षिणो दंष्ट्रिणश्च विनश्यन्ति। सर्वाणिच पुष्पफलपत्र वनस्पत्यौषधि शस्यां दिव्यभिबर्द्धन्ते। सुरासनिस्वादूनिच मृदूनिच भविष्यन्ति। सम्यगेव परिपाचितानि भविष्यन्ति। अतिबृष्टचाना वृष्टि दोषाः सर्वेण सर्व न भविष्यन्ति। कालवृष्टिर्भविष्यतिनाकालबृष्टिः। ये च तस्मिन्विषये महानागास्ते च सम्यगेव कालेनकालं वर्षधारा उत्सृजन्ति। यस्मिन्विषये इयं महाविद्याराज्ञी महाप्रतिसरानाम प्रचरिष्यति। तत्रतैस्सर्वैर्ज्ञात्वा पूजा सत्कारं कृत्वा नानागन्धैर्नाना धूपैर्नाना पुष्पैर्नानावस्त्रैः परिवेष्टयित्वा चैत्यस्योपरि ध्वजाग्रावरोपितां कृत्वा वाद्य तूर्य संगीतिभि–

वाद्यमानाभिः प्रदक्षिणी कर्तव्याः। ततस्तेषां महासत्त्वानां यथाचिन्तितामाणां परिपूरयिष्यति। देवताः शक्रब्रम्हप्रभृतयः यथा यथा विधिनाभिलिख्यते तथा तथा समृध्यति ॥ २२ ॥

पुत्रार्थी लभते पुत्रं गर्भसंधारणी परा सुखेन बर्द्धतेगर्भं सुखेन च प्रसूयते। कालेन बर्द्धतेगर्भः कालेन परिमुच्यते ॥ २३ ॥

किमिति महाब्राम्हण पूर्ववच्छ्रुयतामिहैव मगधविषये राजा प्रसारितापाणिर्नामसचा पुत्रको बभूव। किमितिप्रसारितपाणिरिति ख्यातवान्। तेन राज्ञा जातमात्रेण दक्षिणपाणि प्रसार्य मातुःस्तनौ गृहीत्वा यावदाप्तं क्षीरंपीतं। तौ च स्तनौ सहस्पर्शमात्रेण सुवर्णवर्णौ संवृत्तौ नित्यकालंच महता क्षीरेण प्रवर्धते। तेनकारणेन तस्यराज्ञः प्रसारितपाणिरिति नाम स्थापितमभूत् ॥ २४ ॥

अन्यच्च तस्य राज्ञः यदा याचनकजना आगच्छन्ति तदा स राजां दक्षिणंपाणिं प्रसारयत्युपर्यन्तरीक्षे बोधिसत्त्वः स राजा तेन हेतुना तस्य बुद्धाभि प्रसन्ना देवता दिव्यैरत्नविशेषैः सुवर्ण मणिमुक्ताभिश्चः पाणिपरिपूरयन्ति। तदा स राजा आगतेभ्यो याचनकजनेभ्योऽनुप्रयच्छति। यथा चिंतित मात्रेण सर्वं याचकानां सर्वसुखसन्तिकामान् ददाति। देवतानांच महान्तिपूजा सत्काराणि करोति। पुत्र हेतोर्न च पुत्रं प्रतिलभते। स पौराणां तथागतचैत्यानां पुरतः पूजासत्कारं कर्तुमारब्धः। महान्तिच पूजा सत्काराणि करोति। दानानि च ददाति उपवासमुपवसति। महान्ति च पूजानि करोति अक्षीणान्येवतानि दानानि ददाति ॥ २५ ॥

तत्कस्यहेतो। भूतपूर्वमहाब्राम्हण अस्मिन्नेव मगधविषये मल्लानामजन कुशिनगरवरे महपत्तनवरे भगवतः प्रभूतरत्नस्य तथागतस्य शासने समुत्प धर्मचित्तकः कश्चित् महासत्ते धर्ममतिर्नाम श्रेष्ठिःप्रतिवसतिस्म। स सर्व

नामन्तिके महाकरुणाचित्तमुपस्थाप्येमामेव महाविद्यां महाप्रतिसमारभ्य धर्मं देशयतिस्म ॥ २६ ॥

अथ कश्चिदेवैको दरिद्रपुरुषस्त धर्मं श्रुत्वा तस्यमहाश्रेष्ठिन इदं वचनमब्रवीत्। अहमार्यस्यनिवेशने भृत्यकर्म करिष्यामि धर्मं च श्रोष्यामि । यदामम किंचिद् भविष्यति तदाहुं धर्मपूजायिष्यामिति । तस्य गृहस्थापारं कुर्वतो धर्मंच श्रृणोति यावदपरेण समयेन तेन श्रेष्टिना तस्यैक दीनारं दत्तं तेन सर्वसत्त्व परित्राणर्थं बोधिचित्तमुत्पाद्य सर्वसत्त्वासाधारणंकृत्वा महाप्रतिसरारत्नेति निर्यातितं एवं च प्रणिधानंकृतमनेन दानमहाफलेन मम सर्वसत्त्वानांच दारिद्र दुःखसमुच्छेदः स्यात् तेनकारणेन तद्दान परिक्षयं नगच्छति ॥ २७ ॥

एवंच बहुविधानेकविधः पुण्याभिसंस्कार कृतो देवताश्चपूजिता यावद्बुद्धा भगवन्तः पूजितास्तदा शुद्धावास कायिकाभिंदेवताभिः स्वप्नेदर्शनं दत्तमेवंचाभिहितं भो महाराज समन्तज्वालामाला विशुद्धि स्फुरितचिन्तामणि महामुद्राहृदया- पराजिता महाधारणी महाविद्याराज्ञी महाप्रतिसरानाम तां यथाविधिनाभिलिख्य यथाविधिना कल्पेभिहितेन उपवासोषितायास्तथाविधिनाग्रमहिष्यादेव्याः शरीरे वद्गाधारयितव्या ततस्तेपुत्र प्रतिलम्भो भविष्यति ॥ २८ ॥

अथ स राजा प्रतिविबुद्धस्तस्यारात्र्या अत्ययेन संख्यालिपि नक्षत्र ग्रह विपंच- कान् कुलपुत्रान् बाम्हणान् संनिपात्य यथाविधिना कल्पोपदिष्टेन पुष्येनक्षत्रर ाजेप्रतिपन्ने सुस्नातगात्राया उपवासोषिताया अग्रमहिष्य देव्या यथाविधिनाभिलि- ख्येमां महाप्रतिसरां महाविद्याराज्ञीं कण्ठेवद्धवान् महतीं च महाबुद्धचैत्येषु पूजा- महकार्षीत् अनेकानि च रत्नविशेषाणि सत्त्वानां दानानि ददातिस्म ॥ २९ ॥

ततमो नवानां मासानामत्ययात् पुत्रोजातः अभिरूपः प्रासादिको दर्शनीयः परमया शुभवर्णपुष्कलतया समन्वागत इति ॥ ३० ॥

ततोज्ञात्वा महाब्राम्हण सर्वकामंगमा अपराजितानाम महाप्रतिसरारत्नेति विश्रुता महाविद्याराज्ञी सर्वतथागतपूजिता शक्रस्यापीयं चूडामणिः सर्वथा यदा- शक्रोदेवानामिन्द्रो महासंग्राम मसुरैः सार्द्ध कर्तुकामस्तदा इमामेव महाविद्या- राज्ञीं कवचं कृत्वा संग्राम मध्येवतीरूर्य चूडायामवस्थापयित्वा सर्वानसुरान्निर्जित्य च सुखं स्वस्तिना क्षेमेण देवपुरं प्रविशति सर्वासूरैरधृष्णोभवति ॥ ३१॥

एवं हि महाब्राम्हण प्रथम चित्तोत्पादमुपादाय यावद् बोधिसत्त्वस्य महासत्त्वस्य महाप्रतिसरां महाविद्याराज्ञीं धारयतः सर्वमारैरनवभृद्यता भवति । यस्यैषा विद्याकाय कण्ठगता भवति । स सर्वतथागताधिष्ठितो भविष्यति । स सर्व बोधिसत्त्व संरक्षितो भविष्यति। सर्वदेवमानुष्यासुरस्य लोकस्य राजराजामात्य ब्राम्हगृहपतिभिश्च सततसमितं वन्दितः पूजितः संमानितो भविष्यति। सर्वदेवासुर गरुड गंधर्व किन्नर महोरगाभ्यर्चितः पूजितो भविष्यति। स महासत्त्व इत्युवाच। भगवान्मारबल प्रमर्दकः सर्वव्याधि प्रमर्थितो भविष्यति। सर्वेत्मुपद्रवोपसर्गोपाया- साश्चास्य प्रशाम्यति तस्य महासत्त्वस्य सर्वशोक विगतो भविष्यति। सर्वदेवता- श्चास्य सततसमितं रक्षावरणं गुप्तिं संविधास्यति इमानि चानेन चत्वार्य परा- जिता महाविद्या मन्त्रपद हृदयानि सततसमितेलिखित्वाः काय कण्ठगतानि कृत्वा धारयितव्यानि मनसिकर्तव्यानि वाचयितव्यानि भावयितव्यानि चाध्यशयेन सर्वदुःस्वप्न दुःशकुन दुर्निमित्तामंगलभावाविनश्यन्ति सर्वसुखसंपत्तयश्च प्रादु- र्भविष्यन्ति अत्रमन्त्रपदाः सिद्धाः सर्वकर्मकराःशुभा ॥ ॥ ३२ ॥

तद्यथा। ॐ अमृतवरे वर २ प्रवर विशुद्धे हुं २ स्वाहा। ॐ अमृतविलोकिनि गर्भसंरक्षणि आकर्षणि हुं २ फट् २ स्वाहा। अपराजिता हृदयं ॐ विमले २ विपुले २ जयवरे जयवाहिनि अमृतविरजे हुं २ फट् २ स्वाहा। ॐ भर भर संभर संभर इन्द्रिय वल विशोधनि हुं २ फट् २ रुरुचले स्वाहा।

ॐ मणिधरिवज्रिणि महाप्रतिसरे हुं २ फट् २ रक्ष रक्ष मां सर्व सत्त्वांश्च स्वाहा ॥ ३३ ॥

अशेषैः सर्व बुद्धैर्बोधिसत्त्वैश्च एकक्षनिपातेन एक स्वर निघोषेण इमानि धारणी मन्त्र पदानि भाषितानि महाप्रतिसरा महाविद्याराज्ञी हृदय कवचान्येतानि महा मन्त्रपदानि सर्व तथागत मुद्रया मुद्रितानि अति दूर्लभमप्येषां श्रवणं किंपुनर्लिखनं पठनं वाचनं धारणं स्वाध्यायनं भावनं परदेशनं बुद्धकृत्यमेतदिति। ज्ञातव्यं इयं ह्यतोव सर्वतथागतैः प्रशंसितानुमोदिता व्याकृता परमदुर्लभेऽयं महा-धारणी अपराजिता महाप्रतिसरा अस्या नामधेय श्रवणमपि परमदुर्लभं ॥ १॥

सर्वपाप क्षयंकरी महाबल पराक्रमा महातेजा महागुणोद् भावनीया महाप्रभावा महानुभावा सर्वमारकायिक देवता विध्वंसनकरो सर्ववासनानुसंधि समुद्घाटन-करो सर्वामार पाशछेदनकरी परमन्त्रमुद्रा विषकाखोर्द चूर्णकिरण प्रयोग विद्वेषणाभिचारकाणां च दुष्टचित्तानां विध्वंसनकरी सर्वबुद्धबोधिसत्त्वार्य वर-पूजाभिरतानां सत्त्वानां परिपालनकरी महायानोद्ग्रहणलिखन वाचन पठन स्वाध्यायन श्रवण धारणभियुक्तानां परिपालिकेयं महाधारणी यावद् बुद्धबोधिं परिपूयित्रीयं महाब्राम्हण महाविद्याराज्ञीन क्वचित्प्रतिहन्यते सर्वत्र च महापूजा-प्राप्नोति यथाहं शास्ता जित विद्विषः ॥ २ ॥

किमितिपूर्व परिज्ञातवतीयं महाब्राम्हण महाप्रतिसरा महाविद्याराज्ञी सर्वविध्न-विनायकानां विध्वंसयित्री यदाच भगवान् विपुल प्रहसित वदन मणिकनक रजत रत्नोज्वलरश्मि प्रभासाभ्युड्गत राजो नाम तथागतोर्हन्सम्यक्संबुद्धः प्रथमाभि-संबुद्धो येन बोधिमण्डपस्तेनोपसंक्रान्तः उपसंक्रम्य सर्वबुद्ध प्रशस्तं धर्मचक्रं प्रवर्तयितुकामः ॥ ३ ॥

तदातस्य भगवतः सर्वमारैः सपरिवारैरनेक मार कोटिनियुत शतसहस्र परिवृतैः नाना रुप भय भैरव शब्दाकुलैर्बहुविविध मारविषय विकुर्वनाधिष्ठा-नाधिष्ठितैः नानाप्रहरणवृष्टिरभिनिर्मायागत्य चतुर्दिशंपरिवार्यान्तरायं कर्तु-मारब्धः ॥ ४ ॥

ततः सभगवान् विपुलप्रहसितवदन मणिकनकरत्नोज्वल रश्मि प्रभासाभ्यु-द्गतराजोनाम तथागतोर्हन्सम्यक्सम्बुद्धो मुर्हूततुक्षीमास्थाय इमां महाप्रतिसरां महाविद्याराज्ञौ मनसा सप्तकृत्व प्रवर्त्तयामास ॥ ५ ॥

समनन्तर प्रवर्तितायामस्यां महाप्रतिसरायां महाविद्याराज्ञां तत्क्षणा देवसर्वे तेदुष्टमाराः पापीयां सोददृश्रु स्तस्यभगवत एक कस्माद्रोमविवरादनेकानि निर्मित मारकोटि नियुत शतसहस्राणि पुरुषाणां संनद्ध कवचानां ज्वलितखद्ग परशु-पाश मुद्‌गरासिमुशलत्रिशुल हस्तानां एवं वाचं प्रव्याहरमाणा निर्गच्छन्तिस्म गृण्हत २ वन्धत २ दुष्टमारान्विध्वंसयत दुष्टचित्तान् विचूर्णयत जीवितं सर्वदुष्ट ग्रह विघ्नविनायकानां ये भगवतो बिहेठनां कुर्वन्ति ॥ ६ ॥

ततस्ते सर्वदुष्टमारान् मैत्री खड्गेनाभिनिर्जितान् कृत्वा केचिद् शिक्षापदानि ग्राहिताः केचिद्यावदनुत्तरायां सम्यक्संबोधौ व्याकृताः तत्रमहानुभावाः अन्वेच-पुनस्तान् तथागत रोमविवर निर्गतान्महापुरुषान् दृष्ट्वा तस्मिन्नेव नगरे विव्हलीभूता ऋद्धिपरिहीना नष्टप्रतिभान वलपराक्रमाः प्रणष्टा विध्वस्ताः समस्ता प्रलीना इति । ततो भगवतो धर्मचक्रं प्रवर्तितं यथानयैर्बुद्धै भगवद्भिरिति सर्वविघ्न विनायकान् मारांश्च पापी यसो विध्वंसयित्वात्तीर्णः पारंगत इति ॥ ७ ॥

एवंहि महाब्राम्हण महावलवेग ऋद्धिपारमिताप्राप्ता इयं महाप्रतिसरा विद्याराज्ञी स्मरणमात्रेण सर्वव्यसन भयभैरवेभ्यः परिमोचयति। आशयपरिशुद्धानां सत्त्वानाम-न्येषां दुष्टचेतसां तस्मात्तर्हि महाब्राम्हण नित्यमेवानुस्मरणमात्रेण मनसिकारेन मनसिकर्तव्या सर्वकालं लिखित्वा कायकण्ठगतां कृत्वाधारवितव्या ॥ ८ ॥

किमिति पूर्ववच्छ्रूयतां उज्जयिन्यां महानगर्या राज्ञो ब्रम्हदत्तस्य विजिते केनचित्पुरुषेणापराधःकृतः सराज्ञा ब्रम्हदत्तेन बधकपुरुषेभ्यः आज्ञप्तो गच्छल भवन्त एनं पुरुषं जीविताद्यपरोपयत अथते वधक पुरुषास्तं राज्ञा ज्ञप्तंपुरुषं

गृहीत्वा असिकोशान्निष्कास्य तं पुरषं जीविताद्य परोपयितुमारब्धः ततः सपुरुष इमां महाप्रतिसरां महाविद्याराज्ञी मनसा स्मृतवान् लिखितांच दक्षिणे बाहौ धारयतिस्म तस्यमहासत्त्वस्य महाप्रतिसराया महाविद्यायाः प्रभावेनासिरेक–ज्वालीभूतः खण्डखण्डं यथायां शुभयो विकीर्ण इति ततस्तते वधक पुरुषा इममेव निश्चयंराज्ञे विस्तरेणारोचयामासुः ततोराजा प्रकुपितश्चण्डो भूतः कथयति गच्छत भो पुरुषा अन्यतमस्मिन्पृथिवीप्रदेशे यक्षग्रहा तिष्ठति। तत्र यक्षाणां शतसहस्राणि प्रतिवसन्ति। पिशिताशतानि तत्रानीत्वा छोरयत ततः सपुरुषस्तै वंधकपुरुषैस्तस्यां यक्षगुहायां छोरितः समनन्तर छोरितेस्मिंस्तस्यां यक्षगुहायां ततस्ते यक्षाः सर्वेतुष्ट मनसः प्रधाविता मानुष भक्षयिष्याम इति। ते पश्यन्ति अस्या महाप्रतिसराया महाविद्याया अनुभावेन तं पुरुषमेक ज्वाला–मालार्चिषं देदीप्यमानविग्रहं दृष्ट्वा सर्व एव ते यक्षाः संत्रस्ता दह्यमानं स्व–शरीरं पश्यन्तिस्म। अथ ते यक्षाः विस्मयमापन्नास्तंपुरुष गृहीत्वा वहिर्द्वारे स्थापयित्वा प्रदक्षिणं कर्तुमारब्धाः ॥ ९ ॥

यावत्तवंधक पुरुषै राज्ञः यं निश्चयो विस्तरेणारोचितः ततो भूयोराजा प्रकुपितश्चण्डीभूतः कथयति यद्यैव भवन्तो गच्छ तैनैपूरुषं वद्धानद्यां प्रक्षि–पत ततः सः पुरुषस्तैर्वधक पुरुषैर्वंध्धानद्यां प्रक्षिप्तः समनन्तर प्रक्षिप्तेस्मि महा–पुरुषे सानदो निरुदकी भूता यथासपुरुषस्थलगत एव तिष्ठति। तानिच बन्ध–नानि खण्ड खण्डविचूर्णितानि राज्ञा श्रुतं ततोराजा विस्मितोत्स्फुल्लित वदनः कथयति। अहो विस्मयमिदं पुरुषस्य दृश्यते किमत्र कारणं स्यादितिमे वितर्कः ॥ १० ॥

अथस राजा तं पुरुषमाहुयामन्त्रयित्वा एवमाह किं त्वं भोः पुरुषजानासि ॥ ११ ॥

पुरुष उवाच नाहं महाराज किंचिदपिजानामि अन्यत्र महाप्रतिसरां महाविद्या–राज्ञी धारयामि तस्या एषदेव प्रभावः ॥ १२ ॥

राजा आह । अहो आश्चर्यमिदं महत्महाविद्या सुभाषिता मोहनीमृत्यु दण्डस्य सर्वबुद्धैरधिष्ठिता तारणी सर्वसत्त्वानां सर्वदुःखप्रमोचनी महाविद्या महातेजा कालमृत्यु प्रमोचनी भाषिता कारुणिकैर्नार्थैर्महारोग निवारिणी ॥ १३ ॥

ततो राज्ञा प्रहृष्टमान सेन महाप्रतिसरा महाविद्याराज्ञी पूजिता मानिता अभिनन्दिता च तस्य च पुरुषस्य पश्वन्धं कृत्वा स्वकस्यजन पदस्यपुरः सरतायां नगरज्येष्ठतायामभिषेको दत्तः ॥ १४ ॥

एवंहि महाब्राम्हण इयं महाप्रतिसरा महाविद्याराज्ञी सर्वत्र क्वचिन्न प्रतिहन्यते तस्मादवश्यमेवेयं महाविद्या कायकण्ठगतां कृत्वा धारयितव्या अपितु महाब्राम्हण सुनक्षत्रे इयं महाविद्या राज्ञी सुप्रशस्तेन विद्यानेन लिखितब्या ॥ १५ ॥

अथ समहाब्राम्हणोतीव प्रहृष्ट मना भगवन्तं पंचमण्डलके नाभि प्रणम्य प्रष्टुमारब्धः । कीदृशेन भगवन् विधान्नेन इयं महाप्रतिसरा महाविद्याराज्ञी लिखितब्या ॥ १६ ॥

भगवानाह– श्रृणुमहाब्राम्हण त्वामहं वक्ष्ये सर्वसत्त्वानुकंपया येन सत्त्वाः सुखितो भोन्ति मुच्यन्ते कर्मसंकटात् ब्यथितानांच मोक्षार्थं स्त्रीणां गर्भसमुद्भवं भविष्यति च सत्त्वानां दारिद्र ब्रण रोहणं ॥ १७ ॥

न्यसीषितो भूत्वा नक्षत्रे पुष्पसंमते बुद्धपूजापरोभूत्वा चित्तमुत्पाद्य वोधये। करुणामुदित चित्तेन मैत्रीचापि समन्वितः । हिताधान परश्चापि सर्वसत्त्वेषुनित्यशः । स्नात्वा चन्दन कपूर कस्तूरी सलिलेन च । शुचि वस्त्राणि प्रावृत्य धूपितानि च धूपनैः ॥ १८ ॥

ततो मण्डलकं कृत्वा मृदगोमब्य समन्वितं। पंचरंगिकचूर्णेन चित्रयेन्मण्डलं शुभं । पूर्णकुम्भाश्च चतुरः पंचमं मध्यमण्डले । पुष्पधूपाश्च गन्धाश्चदातब्या

अन्नमहारहा। धूपनं चन्दनं चैव पृक्कागुरु तथैवच। पंच शर्करातुरुष्काश्च दातव्याश्च विधानतः। नानाविधानि पुष्पाणि यथाकालं यथाविधिः। सर्व पुष्प फलैर्वीजैर्गन्धे श्चापि सुमणितान्। घृतमाक्षिक दुग्धश्च पावकैः पायसा दिभिः। यूरयेद्वलि कुम्भाश्च लक्षणाद्यान् सुमंगलाम्। स्थापयेच्चतुरो दिक्षु पंचमं मध्यमण्डल स्थापनीयाः शरावाश्च कोणेषु गंधपूरिताः। चत्वारः कीलकाश्चापि खादिरा दृढष्टिताः। पंचरंगिक सूत्रेण वेष्टयित्वा विचक्षणः। समभाग समोपेता निखन्या मण्डलाद्वहिः ॥ १९ ॥

एवं कृत्वा लिखेद्विप्रयदिच्छेत्सिद्धिमात्मनः। शुष्क भोजन भुक्तेन लिखितब्यं प्रयत्नतः। पट्टे वा भूज वस्त्रे वान्यत्र वा यत्रकुत्रचित्। लिखेत् स्त्रीषु पुत्रार्थी समयग्गोरोचतेनवैः। मध्ये च दारक कुर्यात्सर्वालंकारभूषित। रत्नपूर्ण तथापात्र वामहस्तेन धारयेत्। कार्यपद्मे निषस्मी सो प्रफुल्लित विभूषिते। मणिहार सुवर्णैश्च नानारत्नै विशेषतः। उद्धर्षाश्चापिकर्नब्याश्चतुष्कोणेषुपर्वताः। एवं लिखेत प्रयत्नेन यदिच्छेज्जीवित सुखं। कुंकुमेन लिखेत्वापि पुरुषाणां विशेषतः। तस्येप्सितानि कार्याणि सिध्यन्ते नात्रसंशयः ॥ २० ॥

नानारुपाश्च कर्तब्या मुद्राचिन्हा च पद्मिनी। द्वे पद्मे अथवा त्रीणि चत्वारि पंचवा लिखेत्। पद्मनांच तथा कुर्यात्केशराणि समन्ततः। पुष्पितं पद्मकुर्वीत अष्टकोणपडुवदकं सपरश्रुं तथापट्टं अष्ट पत्र समन्ततः। सखड्गं पद्म कुर्वीत तत्पद्मसितमेवच। पद्मेर्खतथा कुर्यात्सर्वत्र विधिविस्तरमिति ॥ २१ ॥

सर्वत्र विधिचिन्हानि कारयेच्च विचक्षणः। वर्जयेद्वालरुपाणि यत्रचित्त प्रदुष्यति। देवरुपं च कर्तब्यं नानालंकार भूषितं भिक्षुं वज्र धरेकुरर्याद दुष्ट तर्जन तत्परः। चतुरश्च महाराजश्चत्तुः पार्श्रेषु संलिखेत्। ब्राम्हणेस्वी श्वरोलेख्यः क्षक्षियेषु महेश्वरः। शूद्रेषु च सादा सौम्यं चक्रं स्वामिनमा लिखेत्। वैश्यषुच वैश्रवण मिन्द्रं चैव सुरेश्वरं। दारकेभ्यः सदालेख्यः प्रजापतिर्महा–

मतिः । श्यामवर्ण भवेत्तस्य रौद्रं तस्याः समालिखेत् । गौरायां रूपसपन्नं लिखेन्नित्यं यशस्विनः स्थूलायां मानिभद्रश्च लिखितब्यः प्रयत्नतः । कृषायाः पूर्णभद्रश्च मयान्युक्त स्वयंभुवा ॥ २२ ॥

गुर्विण्याश्च महाकालं लिखेच्च ब्रम्ह देवता । अथाश्चाषि यथा पर्व विधि दृष्टेनोक्तं समालिखेत् । लिखित्वैवं विधानेन विधिदृष्टेन कर्मणा । धारयेत्सततं कण्ठे भद्रं तस्य भविष्यति ॥ २३ ॥

ज्वालाग्र चिन्तामणिं कुर्याद्वजाग्र चिन्तामणिं कुर्याद्वज्राग्रे पद्म संस्थितं । पद्म-स्य केशरे पाशं चक्रेचापि तथा परं । वज्रं पद्मे समालिख्य मुङ्गरं पद्म संस्थित । शक्तिं लिखेन्तथापद्मे यथाधिदु दृश्यते । ज्वालाग्रामणयः सर्वे विस्फुलिङ्गः समाकुलाः । पद्दवद्धाश्च कर्तब्या यथाविधिषु कीर्तिताः । नागाश्च फणिनः कार्या मणिज्वाला नवशीर्षकाः । तेपि सर्वे प्रयत्नेन हृदिवज्र प्रतिष्ठिताः । पार्थिवानां वलं नित्यंसार्थ बाहुं लिखेद्बुधः । विद्याधराणां सर्वेषां विद्यादेवीं समालिखेत् । चन्द्र सूर्यांश नक्षत्रौ राहूकेतुग्रहाष्टकं । र्लिखेच्चखण्डखण्डनां पुत्रलाभो भविष्यति ॥ २४ ॥

निश्चयात् विधिना लिख्य शास्त्र दृष्टेन कर्मणा । तस्मात्सर्व प्रयत्नेन धारये-न्मतिमान्नरः । सर्व सिद्धिकरं स्वेतत्मांगल्यं पापनाशनं । प्राप्तोतिपरमं स्थानं स्वयंभू वचन यथा । लोकेस्मिं परमंसौख्यं परलोक परं सुखं । त्रायस्त्रिंश भुवनादौ स्थानं तस्य सुरालय । जम्बुद्वीपे शुभेरम्ये विशिष्टं कुलसंमते । क्षत्रियेषु विशिष्टेषु ब्राहृमणेषु विषतः । जन्मतस्य महात्म्यस्य विद्यासौख्यंच नित्यशः । सर्वबुद्धर्नशक्यंहि पुण्य श्रकस्क प्रकीर्तितं । यत्पुण्यं स अवारनोति प्रतिसरा धारको नरः । नरकद्वारपृठिता स्वर्गद्वारा अपावृताः । सुखसंपत्ति संपन्ना भविष्यति महामतिः । बुद्धश्च बोधिसत्त्वाश्च आश्वासन्ति च नित्यशः । कायेन सुखं संपन्नो वलेन च महान्भवेत् । यथातद्वे जितेन्द्रोक्तं चक्रवर्ती भविष्यति । आश्व-न्तिष्टदेवानां त्रासनं दुष्टचेतसा । भविष्यत्यचिरेणासौ यस विद्या सुभाषिता ।

नासौहन्यते शस्त्रेण नविषेण नचाग्निना । नाकाल मरणंचास्य दूरेगच्छन्ति पापकाः । दर्शनात्स्पर्शना चैव श्रवणादेव सर्वतः । भूतग्रहविवादाश्च उदकाग्नि भयंतथा । मृगाब्याधाग्रहानागा व्याधयश्च सुदारूणाः । सर्वेते नभविष्यन्ति येषां विद्या सुभाषिता । सर्वथा सर्वमारैस्तु शृणुवक्ष्यामि तत्वतः । पूजनीया भविष्यन्ति सर्वसत्त्वोन्तमाहिते ॥ २५ ॥

महाविद्याराज्ञी महाप्रतिसरायाः कल्पः समाप्तः ॥ २६ ॥

रक्षा विधानकल्प प्रथम

अथा तो विद्याधरस्य रक्षाविधानकल्प व्याख्यास्यामि सर्व सत्त्वानुकम्पया।
येन रक्षा विद्यानेन सर्वसिद्धिर्भविष्यति ।
यत्र तत्र कृतारक्षा भवत्येव न संशयः ॥
निर्भयं निर्ज्वरं चैव सर्वग्रह निवारणं ।
सुनक्षत्रानुकूलंच कर्म संकट छेदन ॥
दुर्भुक्तं दुर्लघितं चैव सर्वशत्रुगणैः कृतं ।
दुष्प्रेक्षितं दुर्लिखितं काखोर्दा ये च दारूणाः॥
चूर्णमंत्रकृतं चैव विषभुक्तं तथागरं ।
सर्वे तस्य प्रशाम्यन्ति रक्षां धारयतेऽत्र यः ।
प्रत्यंगिरां विपच्यन्ते या विद्यां समतिक्रमेत् ।
परचक्रा दारूणा येपि प्रत्यामित्र महाभयाः।
सर्वे ते प्रलयं यान्ति प्रतिसरा शापतर्जिताः ।
बुद्धा रक्षन्ति सर्वज्ञा बोधिसत्त्वाश्च शूरताः ॥
रक्षन्ति प्रत्येकबुद्धाः श्रावकाश्च महातपाः ।
अन्येच वहुविधा भूयो देवानागा महर्द्धिकाः ॥
रक्षांकुर्वन्ति तस्ये मे अस्मिं युक्तस्य नित्यशः ।
अस्याः श्रवणमात्रेण विद्याराज्ञा नरोत्तमः।
निर्भयो भवति सर्वत्र इत्येवंमुनिरब्रवीत् ॥ १ ॥

दुः स्वप्ना दुः कृता येच उपसर्गाः सुदारूणाः ।
ब्याधितस्यं महारोगाः ये ग्रस्ता राज यक्ष्मणा ।
अन्येच वहुविधा रोगा गण्डा लूता विचर्चिकाः ।
ईतयो दारूणा येच ग्रसन्ते मानुषी प्रजां ।
मनुष्याणांविनाशार्थं हिंसकाः परमदारूणाः ।

सर्वे ते विप्रणस्यन्ति यत्र रक्षामहाबलाः ।
अनयाकृत रक्षस्तु वध्यप्राप्तो विमुच्यते ।
यदि ग्रस्तः कालपाशेन नीतश्चापि यमालयं ।
आयुस्तस्यविवर्द्धते प्रतिसरालिखनादपि ।
परिक्षीणायुषो यस्तु सप्ताह मृत एव च ।
यावल्लिखितमात्रेण सजीवति न संशयः ।
अथ श्रवणमात्रेण कृतरक्षा विधानतः ।
स्वस्ति सर्वत्रप्राप्नोति सुखंजीवति चेप्सया ॥ २ ॥

अष्टषष्ठिसहस्राणि कोटिनियुत शतानिच । त्रायस्त्रिंशाश्च ये देवाः सर्वेशक्र पुरोगमाः । रक्षार्थ तस्य सत्त्वस्यपृष्ठतः समुपस्थिताः । चत्वारो लोकपालाश्च वज्रपाणिर्महाबलः । विद्याकुलशतैः सार्द्ध रक्षांकुर्वन्तिनित्यशः । सोमश्चसुमनाः सूर्यो ब्रह्म विष्णुर्महेश्वरः । यमश्चमाणिभद्रश्च वलदेवो महावलः । पूर्णभद्रो महावीरोः हारीतिच सपुत्रिका । पांचालः पांचिकश्चैव कार्तिकेयो गणेश्वरः । श्रीरपिचमहादेवी वैश्रवणः सरस्वती । शंखिनी पुष्पदन्तीच तथैवैक जटापि च । धन्या एता महाभागा रक्षां कुर्वन्ति नित्यशः ॥ ३ ॥

षण्डाणां पुत्रजननी गर्भस्थानविवर्द्धनी । रक्षेयं महती तस्य यावज्जीवं भविष्यति । पुरूषाणां जयदा नित्यं युद्धेसंग्राम भैरवे । अनया वरदा भोन्ति देवता धर्म निश्चिताः ॥ ४ ॥

अथपाप विनाशेतु लिखनादेवमुच्यते । तथागता विलोकयन्ति बोधिसत्त्वा महर्द्धिकाः । यशश्च वर्द्धते तस्य पुण्यमायुश्चवर्द्धते । धनधान्यसमृद्धिश्च भविष्यति न संशयः । सुखं स्वपिति मेधावी सुखं च प्रतिबुध्यते । अधृष्यः सर्वशत्रुणां सर्वभूतगणैरपि । संग्रामे वर्तमानस्य जयो भवति नित्यशः । विद्यायां साध्यमानायामियं विद्या महाबला । सुखंसाधयते विद्या विघ्नोस्य न भविष्यति ।

सिध्यन्ते सर्वकल्पाश्च प्रविष्टः सर्वमण्डले । क्षिप्रंच समयज्ञोसौ भवेत्सर्वत्र जातिषु । वैश्वासिको भवेत्तत्र जिनानां गुण धारणे । सर्वमंगल संपूर्णः सर्वसिद्धि मनोरथः ॥ ५ ॥

अस्यां लिखित मात्रायां सर्वसौख्यं समृध्यति । सुखंकालक्रियां कृत्वा भवेत्स्वर्ग-परायणः । विवादे कलहेचैव विग्रहे परम दारूणे । सर्वभयविनिर्मुक्तो जिनोक्तं वचनं यथा । नित्यं जातिस्मरो भोन्ति जातौ जातौ नसंशयः । राजानो वशगा स्तस्य शान्तपुर महाजनाः । सामान्यश्च भवेन्नित्यं साधुभिर्लोकसंमतैः । सर्वेषां च प्रियो भोति ये देवायेचमानुषाः । रक्षांतस्यकरिष्यन्ति दिवारात्रौ नसंशयः । अत्र मन्त्रपदाः सिद्धाः सम्यकसंबुद्ध भाषिताः ॥ ६ ॥

ॐ नमो बुद्धायः । नमो धर्मायः । नमः संघायः ।

नमो भगवते शाक्यमुनये महाकारूणिकाय तथागतार्हते सम्यकसम्बुद्धाय । नमः समस्तेभ्यः सम्यकसंबुद्धेभ्यः भावेनैतान्नमस्कृत्य बुद्धशासन वृद्धये अहमिदानीं प्रवक्ष्यामि सर्वसत्त्वानुकम्पया इमां विद्यां महातेजां महाबल पराक्रमां अस्यां भाषित मात्रायां मुनीनां वज्रमयासने माराश्च मारकायिकाश्च ग्रहाः सर्वेविनायकाः विघ्नाश्च सन्तियेके चित्तत्क्षणा द्विलयंगताः ॥ ७ ॥

तद्यथा ।

ॐ गिरि २ गिरिणि २ गिरिवति गुणवति आकाशवति आकाश विशुद्धे सर्वपापविगते आकाशे गगनतले आकाश विचारिणि मणिधरिवज्रिणि ज्वलितशिखरे मणिभुक्ताखचितमौलिधरे सुकेशे सुवेशे सुवक्रे सुवर्णगौरे अतीते अनुत्पन्ने अनागते प्रत्युत्पन्ने ।

नमः सर्वेषां बुद्धानां ज्वलिततेजसां जमः बुद्धे सुबुद्धे भगवति सुरक्षणि अक्षये सुक्षये सुक्षमे सुप्रभे सुदमे सुदान्ते सुव्रते वर वरदे प्रवरे भगवती भद्रवति

सुभद्रवति भद्रे सुभद्रे विमले जयभद्रे। चण्डि प्रचण्डि चण्डे वज्रचण्डे महाचण्डे। घोरि गान्धारि गौरि चण्डालि मातंगी वर्चसि सुमति पुक्कसि सुमुखि शवरि शावरि शंकरि शांकरि द्रमिडि द्रामिडि रौद्रि रौद्रिणि सर्वार्थसाधनि पर-मार्थसाधनि हन २ सर्वशत्रून् मम सर्वसत्त्वानांच दह २ सर्वदुष्टान् प्रेतपिशाच-डाकडाकिनी मनुष्या मनुष्याणांच पच २ हृदयं विध्वंशय जीवितं सर्वदुष्टग्रहाणां नाशय २ सर्वपापानि मे सर्वसत्त्वानां च भगवति रक्ष २ मम सर्वसत्त्वांश्च सर्वत्र सर्वदा सर्वभयोपद्रवेभ्यः सर्वदुष्टानां प्रदुष्टानां बन्धनं कुरू २ सर्वकिल्विषनाशिनि मार्तण्डे मृत्युदण्डनिवारिणि मानदण्डे मानिनि महामानिनि मानधारिणि चले विचले विमले चिटि चिटि डिटि २ तिटि २ निटि २ किटि २ निटेनिटे किटिकिटे घोरिणि घरिणि निमिणि वीरिणि वीर्यणि। प्रवरे प्रवर समरे चण्डालि मातंगि रून्धसि करसि शरसि वर्चसि सुमति सुमुखी पुक्कसि शवरि शावरि शंकरि शमनि द्रमिडि द्रामिडि दमनि दहनि पचनि पाचनी मर्दनि सरले सरलम्भे हीनमध्योत्कृष्टविदारिणि विहारिणि महिलि महामहिलि निगडे निगडभंजे मत्ते मत्ते मत्तिनि मत्ते दान्ते चक्रे चक्तवाकिनी ज्वले ज्वले ज्वलिनि शवरि शावरि सर्वव्याधिहरणी मुनि २ चुडि २ महाचुडिनि निमि २ निमिधरि त्रैलोक्यवर्द्धनि त्रैलोक्य जननी त्रैलोक्य लोककरि त्रैधातुक व्यवलोकिनि वज्रपर शुपाश मुडग्र् खड्ग शंख चक्र त्रिशूल चिंतामणिमुकुट महाविद्या धारणि रक्ष रक्ष मां सपरिवारं सर्वसत्त्वांश्च सर्वत्र सर्वस्थानगतं सर्वदुष्टभयेभ्यः सर्वमनुष्या मनुष्यभयेभ्यः सर्वव्याधिभ्यः वज्रे वज्रे वज्रधरेवज्रपाणिधरे। हिलि २ मिलि २ किलि २ चिलि २ शिलि शिलि वर २ वरदे वरदांकुशे सर्वत्र जयलब्धे स्वाहा। सर्वपाप विदारिणि स्वाहा। सर्व व्याधिहरणि स्वाहा। गर्भसंभरणि स्वाहा। सर्वत्र भयहरणि स्वाहा। सर्वशत्रु भयहरणि स्वाहा। स्वस्ति भवतु मम सपरिवारस्य सर्वसत्त्वानां च स्वाहा। ॐ भुवः स्वाहा। ॐ स्वस्ति स्वाहा। ॐ शान्ति स्वाहा। पृष्टि स्वाहा। ॐ बलवर्द्धनि स्वाहा।

ॐ जयतु जये जयवति जय कमले विमले स्वाहा विपुले स्वाहा ।

ॐ भूः भुरि २ वज्रवात सर्वा... मणिधार ...व
ॐ जयविद्ये हूा २ फट् २ स्वाहा । ॐ
सत्त्वानां च रक्ष २ हूँ २ फट् स्वाहा ।
ॐ मणिवज्र हृदयवज्र मारसैन्यविद्राविणि हन २ सर्वशत्रुन् वज्रगर्भे त्रासय २
सर्वमार भवनानि हूँ २ फट् स्वाहा ॥ १ ॥

इति महाप्रतिसरा महाविद्याराज्ञी रक्षा विधान कल्प प्रथम समाप्त ।

यस्य कस्यचिन्महाब्राह्मण अनया तथागतमूर्त्या विद्यामन्त्रपदधारिण्या र क्षाकृतागुप्तिः परित्राणं परिग्रहं परिपालनं शान्तिः स्वस्त्ययनं दण्डपरिहारं शास्त्रपरिहारं विषदूषणं विषनाशनं कृतं भवेत् । तस्य परिक्षीणमायुः पुन-रेवविवर्द्धते। सुचिरं सुखं जीवतिस्मृति सम्पन्नश्च भवति। उच्चारणमात्रेण वा वज्रावमार्जनमात्रेण प्रशमं गच्छन्ति । दिनेदिने स्वाध्यायं कुर्यान्महाप्राज्ञोभवति। ओजो बल वीर्य प्रतिभाणसंपन्नो भवति । सर्वपाप कर्मावरणानि चास्यनियत वेदनीयानि निरवशेषं परिक्षयंगच्छन्ति। सर्वबुद्ध बोधिसत्त्व देवनाग यक्षगन्धर्वा-सुरगरूडकिन्नरमहोरगदयश्चास्य ओजो वलवीर्य कायेप्रक्षेप्स्यन्ति महाप्रीतिप्रामोद्य बहुलो भविष्यति ॥ २ ॥

अन्तशो महाब्राह्मण इयं महाविद्यामत्रपदारक्षा तिर्यग्योनिगतानामपि मृगपक्षिणां कर्णपुटे निपतिष्यति। ते सर्वे अवैवर्तिका भविष्यन्ति। अनुत्तराया-संम्यक्संबोधौ। कःपुनर्वादो यः इमां महाप्रतिसरां महाधारणीं श्राद्धःकुलपुत्रो वा कुलदुहिता भिक्षुर्वा भिक्षुणी वा उपासकोपासिको वा राजा वा राजपुत्रो वा राजामात्यो वा ब्राह्मणो वा क्षत्रियो वा तदन्यो वा यःकश्चित्सकृच्छोष्यति। श्रुत्वाच महत्या श्रद्धया गौरवेणाध्याशयेन लिखिष्यति लिखापयिष्यति धार यिष्यति वाचयिष्यति । तीव्रेण मनसा भावयिष्यति परेभ्यश्च विस्तरेण

ॐ भुरि महाशान्तये स्वाहा।
ॐ भूःभुरि २ वज्रवति सर्वतथागत हृदयपूरणि आयुःसंधारणि बल २ बलवति। ॐ जयविद्ये हू २ फट् २ स्वाहा। ॐ मणिधरि वज्रिणि महाप्रतिसरे मम सर्व सत्त्वानां च रक्ष २ हूँ २ फट् स्वाहा।
ॐ मणिवज्र हृदयवज्र मारसैन्यविद्राविणि हन २ सर्वशत्रुन् वज्रगर्भे त्रासय २ सर्वमार भवनानि हूँ २ फट् स्वाहा ॥ १ ॥

इति महाप्रतिसरा महाविद्याराज्ञी रक्षा विधान कल्प प्रथम समाप्त।

यस्य कस्यचिन्महाब्राह्मण अनया तथागतमूर्त्या विद्यामन्त्रपदधारिण्या रक्षाकृतागुप्तिः परित्राणं परिग्रहं परिपालनं शान्तिः स्वस्त्ययनं दण्डपरिहारं शास्त्रपरिहारं विषदूषणं विषनाशनं कृतं भवेत्। तस्य परिक्षीणमायुः पुनरेवविवर्द्धते। सुचिरं सुखं जीवतिस्मृति सम्पन्नश्च भवति। उच्चारणमात्रेण वा वज्रावमार्जनमात्रेण प्रशमं गच्छन्ति। दिनेदिने स्वाध्यायं कुर्यान्महाप्राज्ञोभवति। ओजो बल वीर्य प्रतिभाणसंपन्नो भवति। सर्वपाप कर्मावरणानि चास्यनियत वेदनीयानि निरवशेषं परिक्षयंगच्छन्ति। सर्वबुद्ध बोधिसत्त्व देवनाग यक्षगन्धर्वासुरगरूडकिन्नरमहोरगदयश्चास्य ओजो वलवीर्य कायेप्रक्षेप्स्यन्ति महाप्रीतिप्रामोद्य बहुलो भविष्यति ॥ २ ॥

अन्तशो महाब्राह्मण इयं महाविद्यामत्रपदारक्षा तिर्यग्योनिगतानामपि मृगपक्षिणां कर्णपुटे निपतिष्यति। ते सर्वे अवैवर्तिका भविष्यन्ति। अनुत्तरायासंम्यक्संबोधौ। कःपुनर्वादो यः इमां महाप्रतिसरां महाधारणीं श्राद्धःकुलपुत्रो वा कुलदुहिता भिक्षुर्वा भिक्षुणी वा उपासकोपासिको वा राजा वा राजपुत्रो वा राजामात्यो वा ब्राह्मणो वा क्षत्रियो वा तदन्यो वा यःकश्चित्सकृच्छोष्यति। श्रुत्वाच महत्या श्रद्धया गौरवेणाध्याशयेन लिखिष्यति लिखापयिष्यति धारयिष्यति वाचयिष्यति। तीव्रेण मनसा भावयिष्यति परेभ्यश्च विस्तरेण

सप्रकाशयिष्यति। तस्य महाब्राम्हणं अष्टावकालमरणानि सर्वथा न प्रतिकांक्षित-ब्यानि ॥ ३ ॥

नचास्यकाये महाव्याधयो भविष्यन्ति। नचास्य शरीरे अग्नि नविष नशस्त्रं न गरं नकाखोर्द किरणवेताडं नमन्त्रकर्म नचूर्णप्रयोगो नचांग शूलं नज्वरो नशिरोर्त्तिवा। एकाहिका द्वैतीयका स्त्रैतीयकाः चातुर्थिकाः सप्राहिका वा ज्वराः कायेन संक्रमिष्यन्ति। संस्मृत एव सुखं स्वस्तिना स्वपिति स्मृत एव प्रतिविवुध्यते। महापरिनिर्वाणलाभी भविष्यति।

सकृत्सह धर्मेण महदैश्वर्यमधिगच्छति। यत्रयत्रोपपद्यते तत्रतत्र जातौजातौ जातिस्मरो भविष्यति। सर्वसत्त्वानांच प्रियो भविष्यति। वन्दनीयश्च भविष्यति। पूजनीयश्च सपुद्गलो भविष्यति। सर्वनरक तिर्यग्योनिगतिग्रहन प्रेतोपत्पत्तिभ्यश्च परिमुक्तो भविष्यति ॥ ४ ॥

यथाचार्क मण्डलं रश्मिभिः प्रतपति। तथाज्ञान रश्मिवभासकरो भविष्यति। यथाचन्द्र मण्डलममृतेनप्रभवतां सर्वसत्त्वानां कायंप्रल्हादयति। तथेयं धर्मामृतेन सर्वसत्त्वानां चित्तसंतानानि प्रल्हादयिष्यति।

सर्वदुष्ट यक्षराक्षस भूतप्रेतपिशाचोन्मादापस्मारक डाकडाकिनी ग्रहविघ्न विनायकादयः सवसां महाप्रतिसराया महाविद्याराज्ञाः प्रभावेन नशक्ता विहेठनां कर्तु उपसंक्रमतां च तेषांमियं विद्याराज्ञी स्मर्त्तव्याः। ततस्ते सर्वदुष्ट चित्ताविद्याधरस्यार ज्ञया श्रवणविधेया भविष्यन्ति ॥ ५ ॥

अस्या एवानुभावेन यदुत महाप्रतिसराया महाविद्याराज्ञा नचास्य शत्रुभयं भविष्यति। अनतिक्रमणीयश्च भविष्यति। सर्वशत्रुगणै राज्ञा राजमहामात्यर्ब्राम्हण गृहपतिभिश्च। अन्तशोपि महाब्राहृमण वध्यार्होवधक पुरूषैरूत्थितान्यपिशस्त्राणि खण्ड खण्डं गच्छन्ति। यथा पांशुमयानीवावशीर्यन्ते। तस्मिंश्चसमये सर्वेधर्मा अस्य संमुखी भविष्यन्ति। महच्चास्य स्मृतिवलं भविष्यति ॥ ६ ॥

रक्षोध्नी परमाह्येषा पवित्रा पापनाशनी। श्रीकरी धीकरी चापि सर्वगुण विवर्द्धनी। सर्वमंगल करीह्येषा सर्वामंगलः नाशिनी। सुस्वप्न दर्शिनी चापि दुःस्वप्नस्यविनाशिनी। स्त्रीपुंसयोः परारक्षा विद्येयं हि महावला। अटवी कान्तार दुर्गेषु नित्यं मुच्यन्तितत्क्षणात्। सर्वकामाश्च लभते संबुद्ध वचनं यथा। पथउत्पथमापन्न एतां विद्यामनुस्मरेत्। पन्थानं लभते शीघ्रं भोजनं पानमुत्तमं। कायेन मनसा वाचा यत्कृतं पूर्वजन्मसु। अश्रुभं वहुविधं किंचित् तत्सर्वं क्षपयिष्यति ॥ ७ ॥

स्मरणा द्धारणाच्चैव उद्ग्रहाल्लिखनादपि। पठना द्वाचनाच्चैव जपनात्पर देशनात्। भविष्यत्प चिरेणासौ सर्वधर्म गतिंगतः। एवं धर्म्म रसे प्राप्ते पापागच्छन्ति संक्षयं। सिध्यन्ते सर्वकर्माणि मनसा यद्यदीप्सितं। सर्वमृत्यु भय चैषा त्रांणतस्य भविष्यति। राजाग्नि रूदकं चैव विद्युद्वातस्करोपि वा। युद्धे संग्राम कलहे दझंष्ट्रिणो येच दारूणाः। ते सर्वे प्रलयं यान्ति विद्याया लक्षजायतः। विद्यामिमां परांसिद्धां सर्वबुद्धै हि देशितां। कीर्तमानान सीदन्ति बोधिसंभार पुरये। सर्वेषु चैव स्थानेषु इमां विद्यां प्रयोजयेत्। यानिचेच्छन्तिं कार्याणि स्वपरार्थ प्रसिद्धये। सिद्धन्त्ये यत्न तस्तानि विद्यातो नात्र संशयः ॥ ८ ॥

नमः सर्वतथागतेभ्यो येतिष्ठन्ति दशसुदिक्षु। ॐ मणिवज्रे हृदयवज्रे मार- सैन्य विदारिणि हन हन सर्वशत्रुन् तर तर रक्ष रक्ष मां सपरिवारं सर्वसत्त्वांश्च वज्रे वज्रे वज्रगर्भे त्रासय त्रासय सर्वमार भवनानि हूँ हूँ फट् फट् स्वाहा। बुद्धमैत्री सर्वतथागत वज्रकल्पाधिष्ठिते सर्वकर्मावरणान्यपनय स्वाहा ॥ ९ ॥

इदानीं संप्रवक्ष्यामि आतुराणां चिकित्सतं। चतुरस्र मण्डलं कुर्यान् मृदगोमय समन्वितं। पंचरंगिक चूर्णेन चित्रयेन्मण्डलं शुभं। चतुरः पूर्णकुंभाश्च स्थापयेद्विधिना बुधः। पुष्पाण्यवकिरेत्तत्र धूपयेद्धुपमुत्तमं। बलिकर्मच कुर्वीत महासाहस्रमर्दनं। पूर्ववद् गन्ध पुष्पाणि दद्याच्चात्र विधानतः। चतस्रः कीलकाः

स्थाप्या सर्वश्च बद्धपट्टिकाः । स्थापयित्वातुरं पश्चात् शुचिवस्त्र समावृतं । शुभगन्धानुलिप्तांगं प्रवेशयेत्मध्यमण्डले । ततः पूर्वामुखं निषीद्येतां विद्यामुदाहरेत् । सप्तशो जप्तया चास्य रक्षां कुर्याद्विचक्षणः । आतुरस्य तथोत्थाय वाराश्चाप्येकविंशति । उदाहरेदिमां विद्यां सर्वरोगोपशान्तये । भूयश्च सप्तवारान्वै वलिकुंभं सुमंत्रितं । प्रश्चान्निवेदयेन्मंत्री वलिपुष्पं यथाविधिः । इत्येवं दक्षिणेपार्श्वे प्रक्षिपेत्सप्त एव तु । पश्चिमायांतु तत्रंव उत्तरायां तथादिशि । अधऊर्ध्वंच सप्तैव कृतारक्षा भविष्यति । एवं कृते द्विज श्रेष्ट सर्व दुःखात्प्रमुच्यते । एषा रक्षा मया ख्याता शाक्यसिंहेन तायिना । नास्तस्या पराकाचिद्रक्षाविद्या त्रिधातुके ॥ १० ॥

न तस्य मृत्युर्नजरानरोगो नचप्रियैर्जातु वियोग भावः । नचापि येस्तस्य हि संप्रयोगो भवेद्वियोगोद्भव चित्त सन्ततिः । यमोपि तस्यैव च धर्मराजः करिष्यते पूजां सगौरवेण । कथयिष्यते देवपुरं हि गच्छ क्षणिकमिदं नरकं करिष्यसि । ततो विमानैः स बहुप्रकारैर्महर्द्धिको याति सुरालयं शुभं । एवं ह्यसौ नरमरू यक्ष राक्षसैः संपूजितस्तत्र सदा भविष्यति । वज्रपाणिश्च यक्षेन्द्र ईन्द्रश्चैव शचीपतिः । हारीति पांचिक श्चैव लोकपाला महर्द्धिकाः । चन्द्र सूर्योसनक्षत्रौ येग्रहाः परमदारूणाः । तेच सर्वे महानागा देवता ऋषयस्तथा । असुरागरूडा गन्धर्वाः किन्नराश्चमहोरगाः । नित्यानु बद्धा रक्षार्थ यस्यविद्या महाबला । लिखिनां धारयेत् प्राज्ञो बाहुबद्धां महर्द्धिकां । महतीं लभते पूजां संपदं चापि नित्यशः ॥ ११ ॥

इदमवोचदभगवानात्तमना आयुष्मानन्दः स च महाब्राम्हण स्तेच बोधिसत्त्वास्ते च महाश्रावकाः सा च सर्वावती पर्षत्सदेवमानुषासुर गरूड गन्धर्वश्च लोको भगवतो भाषितमभ्यनन्दन्निति ॥ १२ ॥

आर्यमहाप्रतिसरा महाविद्याराज्ञी रक्षाविधानकल्पो विद्याधरस्यायं द्वितीयकल्प समाप्तः ।

ॐ नमो भगवत्यै आर्य्यमहासाहस्र प्रमर्दन्यैः ॥

एव मया श्रुतमेकस्मिन् समये भगवान् राजगृहे विहरतिस्म। गृध्रकूटे पर्वते दक्षिणपार्श्वे बुद्ध गोचरे रत्नवृक्षप्रभासे वनखण्डे महता भिक्षुसंघेन सार्द्ध-मर्धत्रयोदशभिर्भिक्षुशतैः ॥ १ ॥

तद्यथा। आयुष्मता च शारिपुत्रेण। आयुष्मता च मौद्गल्यायनेन। आयुष्मताच महाकाश्यपेन। आयुष्मता च गयाकाश्यपेन। आयुष्मता च नदीकाश्यपेन। आयुष्मता चोरुविल्वाकाश्यपेन। आयुष्मताचाज्ञातकौण्डिन्येन। आयुष्मताच महाकात्ययनेन। आयुष्मता च वकुलेन। आयुष्मता च वप्पेन। आयुष्मता च कौष्ठिलेन। आयुष्मता च वागीशेन। आयुष्मता चाश्वजिता। आयुष्मता च सुभूतिना। आयुष्मता च सुवाहुना। आयुष्मता चानिरूद्धेन। आयुष्मता च रेवतेन। आयुष्मता च नन्देन। आयुष्मता च नन्देन॥ २ ॥

एवं प्रमुखरर्द्धत्रयोदशभिर्भिक्षुशतैः। तस्मिंश्च समये भगवान् सभिक्षुसंघः मागधेन राज्ञा जातशत्रुणा वैदेहीपुत्रेण सत्कृतो गुरूकृतो मानितः पूजितश्चार्चित-श्चीवरपिण्डपात्रशयनासनग्लान प्रत्ययभैषज्यपरिष्कारैः। तस्मिंच समये वैशाल्यां महानगर्यां महोपद्रव प्रादुर्भूत्। महतो चाकालवृष्टिर्वाताशनिर्महामेघश्च समुत्थितो देवो गर्जते गुडगुडायते विद्युतश्चरन्ति दशदिश श्चाकुलीभूताः। तमोन्धकार-श्च प्रादुर्भूतः। नक्षत्राणि न भासन्ते चन्द्रसूर्यो नप्रभवतो नभासतो न तपतो नविरोचतो न च प्रभास्वरौ भवतः॥ ३ ॥

अथ खलु भगवान द्राक्षीद्दिव्येन चक्षुषा विश्रुद्धे नाति क्रान्त मानुष्यकेन वैशाल्यां महानगर्य्यामेते उपद्रवाः प्रादुर्भूताः। अप्पेकत्यानां लिच्छवीनांया ग्रामान्तपुरी साभूतैरधिष्ठिताभि संसृष्टाः। अप्पेकत्यानां वैशालिकानां लिच्छविनां

या ग्रामान्तः पुरुषा भूतैरधिष्ठिता अभिसंसृष्टा अप्येकत्या ग्रामकुमारका: गणकमहामात्यामात्यपार्षद्या: दासीदास कर्मकर प्रेष्य परिचारका भूतैरभि-भूता: । समन्ततश्च वैशालीजनपदेया भिक्षु भिक्षुण्युपासको पालिका भीतास्त्रस्ता: संविग्ना: संहृष्ट रोमकूपजाता: ऊर्ध्वमुखा: प्रक्रन्दन्तो । बुद्धधर्म संघान्नमस्यन्ति । अतिक्रान्तवर्णा ये च ब्राह्मण गृहपतयो बुद्धशासने नाभिप्रसन्ना: । तेचाप्येकत्या ब्राह्मण गृहपतयो ब्राह्मणं नमस्यन्ति । केचित्पुन: शक्र: केचिल्लोकपालान्न-मस्यन्ति । केचित्पुनर्महेश्वरमाणिभद्रं पूर्णभद्रं हारीतिं चन्द्रसूर्यो ग्रहनक्षत्र पर्वत वनखण्डौषधिवृक्षनद्युत्सदंसरोह्रदकूपतडाग चैत्यस्थानान्यपि नमस्यन्ति । कथं नामै तस्माद्वयमेवंरूपादुपद्रवाद् भयस्थानात्परिमुच्येमिति ॥ ४ ॥

अथ भगवास्तथारूपं ऋद्ध्यभिसंस्कारमकार्षीत । यथारूपेण ऋद्ध्यभिसंस्कृतेन त्रिसाहस्र महासाहस्र लोकधातुं स्वरेण विज्ञप्य सदेवमानुषासुर लोकं प्रसाद्य सन्निपातयामास ॥ ५ ॥

अथ ब्रह्मासहापतिर्ब्रह्मकायिकाश्चदेवा: शक्रश्च देवानामिन्द्रो देवाश्च त्रायस्त्रिशाश्चत्वारश्च महाराजा: चतुर्महाराजिकाश्चदेवा: । अष्टाविंशतिश्च महायक्षसेनापतय: द्वात्रिंशश्च महायक्षा नग्ना हारीतिच सपुत्रिका सपरिवारा-तिक्रान्तवर्णा अतिक्रान्तायांरात्रौ केवलं कल्पं गृध्रकूटंपर्वतं स्वकेनवर्णानुभावेनोदा-रेणावभासेनावभास्य येन भगवां स्तेनोपसंक्रान्ता: । उपसंक्रम्य भगवत: पादौ-शिरसाभिवन्दित्वा एकान्ते स्थित्वा एकवागेकस्वरेणैकपदेन भगवन्तं गाथा-भिरभिटुष्टुबु: ॥ ६ ॥

दीप्तकांचननिर्भास पूर्णचन्द्र प्रभास्वर: ।
श्रीवैश्रवणद्वीर रत्नानामाकरोत्मसि ॥
सिंहवारण विक्रान्त मत्तनागपराक्रम: ।
पर्वतो वा सुवर्णस्यनिष्कं जाम्बूनदस्य च ।

चन्द्रो वा विमले व्योम्नि नक्षत्रेभिः पुरस्कृतः ।
मध्ये श्रावकसंघस्य लक्षणैः समलंकृतः ।
लोकः सदेवको ह्येषमुनैः शरणमागतः ।
मनुष्याणां हितार्थाय रक्षाकालमुपस्थितः ।
महासाहश्रप्रमर्दनं सूत्रं सर्ववुद्धैः प्रकाशितं ।
आचक्रवाडपर्यन्तं सीमा बन्धनमुत्तमम् ।
नमस्ते पुरूषवीर नमस्ते पुरूषोत्तमः ।
कृतांजलिर्नमस्यामि धर्मराजं महामुनिम् ॥ ७ ॥

अथ भगवान्मुहूर्त तूष्णीभावेनाधिवास्य चतुरोमहाराजानामन्त्रयामास। प्रतिरुपं यद्युष्मत्पर्ष दोस्मत्पर्षदं विहेठयितव्या मन्यन्ते। तत्कस्यहेतोः। इतोहि मानुष्ये लोके बुद्धोत्पादो धर्मश्चाख्याता च संघः सुप्रतिपन्नः। इदं मस्मिन् वीजमवरोप्य बुद्धाभगवन्तो लोके उत्पद्यन्ते। प्रत्येकबुद्धाश्चार्हन्तः श्रावकाश्चास्मिन्लोकेकुशलमूलान्यवरोप्य सदसतो द्वात्रिंशतां देवनिकायाना मन्यतरे देवनिकाये उत्पद्यन्ते। राजानोपि भवन्ति चतुरंगिणाश्चतुर्द्वीपेश्वराश्चक्रवर्तिनः। समुद्रपर्यन्ते पृथ्वीमण्डले धर्मेण राज्यं कारयन्ति। तेषां च पुत्रसहस्रं भवन्ति शूराणां वीराणां वरांग रूपिणां महानग्न वलवेग धारिणां परसैन्य प्रमर्दकानां सप्तरत्न समन्वागतानाम् । तद्युष्माकल्पोत्सुक विहारेण विहरतामेवं रूपेणास्मिल्लोकेनोपत्तिर्भविष्यति ॥ ८ ॥

अथ वैश्रवणो महाराजोऽभ्युद्गम्योत्थायासनादेकांशमुत्तरासंगं कृत्वा दक्षिणंजानुमण्डलंपृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनांजलिं कृत्वा भगवन्तमेव नमस्यमानो भगवन्तमेतदवोचत् ॥ ९ ॥

सन्ति भदन्त भगवन्तस्माकमुदाराणि गृहस्थान भवनानि नगरोद्यान विमानकूटागार हर्म्यनिर्यूह तोरणगवाक्ष शुभरुचिरविविध विचित्र पट्टदाम विचित्राणि

घण्ठा चामर मुक्ताजाल परिक्षिप्तनि धूपघटिकानि धूपितानि मुक्त पुष्पा-भिकीर्णानि । येषुच वयं नारीशतसहस्र परिवृताः संपूर्णैः पंचभिः कामगुणैः समर्पिताः समन्वंगी भूता विहरामः ॥ १० ॥

तेषामस्माकं भदन्त भगवतः प्रमत्तानां प्रमादविहारिणां विहरतां पर्षत्समन्ताद्दश दिशोन्नपान भोजनानि मार्गयन्ति प्रपलायमानानां स्त्रीपुरुष दारकदारिकाणां जातगर्भस्थानां तिर्यग्योनि गतानामपि च प्राणिना मोजो हरन्ति । विहेठयन्ति विघ्नयन्ति मारयन्ति जीविता द्वयपरोपयन्ति । ते वयं भदन्त भगवतोन्तिके चतुर्णां पर्षदां पुरतः स्वकस्वकानां च पर्षदां रूपलक्षणं दर्शयिष्यामः ।

यस्यपर्षदाय ग्रहो भविष्यति । ततस्तस्य महाराजस्योदार चैत्य प्रतिमा कर्तव्या । आतुरस्य च हस्तेन तस्य महाराजस्य नाम्ना नाना गंध धूपाः प्रधूपयिंतव्याः । पुष्पावकीर्णा धारणीकृत्वा दीपांश्चादीप्य तत्र चैत्य पूजा कर्तव्या ॥ ११ ॥

मदीया भदन्त भगवंपर्षदो यक्षग्रहगृहीतस्य ईदृशं रूपलक्षणम्। सति त्रसते-ऽभीक्ष्णप्रलपं च विकुप्यते । निद्राचा विशते तस्य शूलोवाप्युपजायते । ऊर्ध्वं संप्रक्षते नित्यं नक्षत्राण्यनुधावति । रात्रौ प्रहर्षमायाति वेपतेस्तनते सदा । तत्रमन्त्रपदान्यस्ति लोकनाथश्रृणो हिमे ॥ १२ ॥

स्याद्यथेदम्। सिद्धेसुसिद्धे सत्ये अरे अरणे वले महावले जम्भे स्तम्भे जटिले अखने मखने खखने खरटे खरंगे हरिपिंगले तिमिंगिले तिमिंगालिनी मंगले सिध्यन्तु मन्त्रपदा स्वाहा । मम सर्वसत्त्वानांच वैश्रवणस्य महाराजस्यनाम्ना वले नैश्वर्याधिपत्येन च स्वाहा ॥ १३ ॥

अथ धृतराष्ट्रो महाराजोऽभ्युद्गम्यासनादेकांशमुत्तरासंगं कृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं कृत्वा भगवन्तमेव

नमस्यमानो भगवन्तमेतदवोचत्। अस्मत्पर्षदो भदन्त भगवन् गन्धर्व ग्रह गृहीत-स्य ईदृशं रूपलक्षणौ ॥ १४ ॥

नृत्यते गायते चापि भूषणानि प्रियायते ।
अलुब्धः सत्यवादीच हसते कुप्यते पुनः ।
तृषायते रक्तनेत्रो ज्वरोस्या विशते सदा ।
उन्मिषयति न चक्षुश्च शयते च पराङमुखः ।
तत्र मन्त्रपदान्यस्ति लोकनाथ श्रृणोहि मे ॥ १५ ॥

स्याद्यथेदं। अखे नखे विनखे कुनखे वन्धे वराणु चपले वखे वखिने अखिने नखिने वहुले भगे भगन्दरे वशे वशवर्तिनि स्वाहा। मुच्यन्तुमां सर्व–सत्त्वांश्च सर्वग्रहेभ्यो धृतराष्ट्रस्य महाराजस्य नाम्ना वलेनैश्वर्य्याधिपत्येन च स्वाहा ॥ १६ ॥

अथ विरुढको महाराजोभ्युद्गम्यासनादेकांशमुत्तरासंगं कृत्वा दक्षिणं जानु-मण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं कृत्वा भगवन्तमेव नमस्यमानो भगवन्तमेतदवोचत्। अस्मत् पर्षदो भदन्त भगवन् कुम्भाण्ड प्रेत ग्रहगृहीतस्य ईदृशं रूपलक्षणम् ॥ १७ ॥

बलवती तृष्णाभोति विभ्रान्तश्चापि प्रेक्षते। मुखंलोहितमार्भातिभूमौ स्वपिति कुंचितः। दुर्वर्णः कृशगात्रश्च दीर्घकेशनखस्तथा। दुर्गन्धोमलिनश्चापि मृषासंभिन्न भाषते। तत्रमन्त्रपदान्यस्ति लोकनाथ श्रृणोहि मे ॥ १८ ॥

तद्यथा। खखमे खल खलने खरले खलमे खलेमि खललिखे करखे खटिनि खरलि करखि खरमिने कसने करटि कालिकामिनि विमलि विधिये विधियसमये समइते समि समिनि स्वाहा। शाम्यन्तु मम सर्वसत्त्वानांच सर्वग्रह सर्वभयोपद्रवा विरुढकस्य महाराजस्य नाम्नावले नैश्वर्य्याधिपत्येन च स्वाहा ॥ १९ ॥

अथ विरूपाक्षो महाराजोऽभ्युद्गम्यासनादेकांशमुत्तरासंगकृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिकृत्वा भगवन्तमेव नमस्यमानो भगवन्तमिदं वचनमुवाच। अस्मत्पर्षदो भदन्त भगवन्नागसुपर्णग्रह गृहीतस्य इदृशं रूपलक्षणम्॥ २०॥

हिक्कतेश्च सतेचापि शीतलं गात्र मे वच। स्विद्यते फेनलालास्य स्वपतेच पुनः पुनः। वर्णवान्भवते शूरो वेपते धावते तथा। पुनर्नखान् विदर्शयन्ति महींविशति रोदति। तत्रमन्त्रपदान्यस्ति लोकनाथ श्रृणोहि मे॥ २१॥

स्याद्यथेद। ऋममे ऋकमनि ऋकसे ऋुकसे ऋकसमे ऋुसुमे ऋुसमे ऋुके ऋुऋुमे ऋुगे अगले नगले समगले कहुमे हुमे चक्रमे अलुके कलमके कलले कलटके इलेमिलेविले अगरूवति स्वाहा। स्वस्त्यन्तु मम सर्वसत्त्वानांच विरूपाक्षस्यमहाराजस्यनाम्नावलेनैश्वर्य्याधिपत्येन च स्वाहा॥ २२॥

अथ भगवांस्तावदेव सर्वावत्याः पर्षदः पुरतः सिंहनादं नदति। दशबल समन्वागतोऽहं चतुर्वैशारद्य विशारूदः पर्षद्युदारमार्षभं सम्यक सिंहनादं नदामि। ब्राह्मंचक्रं प्रवर्तयामि। मारोनिर्जित एकेन ससैन्यवल वाहनः। रक्षायै सर्वसत्त्वानां सर्वविद्या श्रृणोथ मे॥ २३॥

स्याद्यथेदं। असंगे खड्गवते वलनिर्घोषे सूरे सूरवते वज्रसमे वज्रं समे वज्रधरे स्तम्भे जम्भे दृढसारे विरजे विघसे वराग्र प्राप्ति अरणे दिशि विघुष्टे स्वाहा। स्वस्त्य-स्तु मम सर्वसत्त्वानांच सर्वतथागतस्यवलेनैश्वर्य्याधिपत्येन च स्वाहा॥ २४॥

बुद्धस्य वचनं श्रुत्वा लोकपालश्चतुर्दिशं। उत्त्रस्ताभीत संविग्ना अस्थासुः प्राञ्जलिकृत्वाः। शेषा भूतगणास्त्रस्ता विक्षिप्ता विरली कृताः प्रपलायन्ते दशदिशोमहानाथमुदीरयन्॥ २५॥

तद्विदित्वा महाराजास्त्रिगुप्तं समुदाहरन् । अहो विद्या महासाहस्र प्रमर्दनी। यस्यास्त्र सन्ति भूतानि श्रुत्वा बुद्धस्य भाषितं । यया प्रज्वलितो वन्हिरसिर्वा-तैलपाचित: ।

क्षुरधारासमा विद्या गौत्तमेन प्रकाशिता । योहृयेतन्नाभिमन्येत बुद्धवाक्यं सुभाषितं । तस्यान्नब्रह्मशापेनजोष्ठ पुत्रोनभोष्यति ॥ २६ ॥

अग्निं प्रज्वालयित्वातु गृहीत्वासितसर्षपान् घृतमण्डेन संयुक्ता प्रक्षेप्तव्याहुशने। हेष्टमुर्द्ध चतुर्दिक्षु क्षिप्ताच वरूणोदकं । यदिक्षिप्र नमुंचेयुरिदंश्रुत्वा सुभाषितं। भवन्तु ज्वलिता: सर्वे यथाग्नौ धृत्तसर्षपा: । क्षेमंचतेनलपूस्यन्ति यक्षदण्डेन तर्जिता: । तेषांदक्षिणपाश्र्वेतु महागण्डो भविष्यति । चित्ररूपा भविष्यन्ति यक्ष-रोगेण पीडित्ता: ॥ २७ ॥

अडकवती राजधानीं नगच्छन्ति कदांचन । निवेशनं नपश्यन्ति कुवेरस्य यशश्विन: । आसनं च न लभ्यन्ति भूतसंघा: समागमे । अन्नपानेन रहिता जायन्ते यक्षमण्डले । महासाहश्रप्रमर्दनं सूत्रं यो यक्षेनानुवर्तते । तस्य वज्रधर: कुद्धोमूर्द्धानं स्फोटयिष्यति । कर्कश क्षुरधारेण जिव्हां तस्ये हृछेत्स्यति । तीक्ष्णेन चास्य शस्त्रेण कर्णौंनासां च क्षेत्स्यति । प्रपातयति चक्रेणक्षुरधारेण मस्तकं। लोह मुद्गलकीलेन हृदयं चास्य पीडयेत् । मुखत: श्रवतेचास्य पूयमुष्ण च शोणितं । विद्यापाशेन दण्डेन सदा संसारगामिन: । तत्रैव संसरिष्यन्ति संसार चक्र मण्डले ॥ २८ ॥

श्रियाविष्टा महाराजा सभागम्य चतुर्दिशं । धर्मसन्नाह संनद्धा निषण्णा भद्रपीठके । धृतराष्ट्रस्तु पूर्वायां दक्षिणेन विरूढक: । पश्चिमेन विरूपाक्ष कुवेर श्चोत्तरांदिशम् ।

राज्ञा समागतानां हि ज्वलितानां तेजसाश्रिया । अन्तरीक्षं तदा शास्ता सर्वज्ञोहि समुद्गत: । वज्रासने निषद्येह विमाने ब्रह्मनिर्मिते ॥ २९ ॥

ततो ब्रह्मा महाब्रह्मा प्रांजलिस्तं नमस्यति। सुर्वण पर्वतः श्रीमान् यष्टिकांचन सन्निभः। पद्मपुष्प वहुत्फुल्लः शालराजेव पुष्पितः। पूर्णचन्द्रो रविर्वापि नक्षत्रैः परिवारितः। सुवर्ण वर्णकायेन लक्षणैर्मुनिरावृतः ॥ ३० ॥

संस्तुत्वा लोक प्रद्योतं ब्रह्मालोक पितामहः। पुरोतो लोकनाथस्य लोकपालानथा ब्रवीत्। नप्राप्तं लोकपालानां पर्षदीनानुशासनं। इतो बुद्धाहि जायन्ते बुद्धाः प्रत्येकजा अपि। इतश्च श्रावकोत्पत्ति र्देवाश्चापि समुत्थिताः। जायन्ते ब्राह्मणाश्चव षडंगवेदपारगाः। ऋषयश्च महाभागा इतः श्रमण ब्राह्मणः। अल्पोत्सुकानांयुष्माकं वध्यतेमानुषी प्रजाः ॥ ३१ ॥

ब्रह्मणो वचनं श्रुत्वा लोकपालावचोव्रवन् एवमेतन्महाब्रह्मन्ने तमेतन्महा-मुने। एतेविशोषयिष्यामः समन्तात्सागरं वयम्। सुमेरुं कम्पयित्वातु धरणी परि-वर्त्यच। वन्धयिष्याम पाशेन चन्द्रसूर्यौ तथानिलम्। नक्षत्राणिच सर्वाणि गाढेना व्याहतेन च। दिशश्च दर्शनाभासास्तेषां नेष्याम सर्वदा। ये प्रदुष्टा भविष्यन्ति न च लोकहितोद्यताः। लोकः सदेव कोत्स्येषगृह्मते भूतकारणान्। परिभवन्ति च भूतानि हिंसन्तेमानुषी प्रजाम्। अत्रमन्त्रधराः कामं दर्शयन्ति पराक्रमं। अतिक्रा मन्ति ये विद्यां मंत्रानौषध मेवच। विद्यातिक्रान्ता पर्षदः समन्त दण्ड तर्जिताः। कृत्वा समानयिष्यामः लोकनाथस्यचाग्रतः। तेषां दण्डं प्रणेष्यामि सूत्रं ब्राह्मणं निर्मितं। यस्येदं भाषतेविश्वं तर्जते भूत मण्डलं ॥ ३२ ॥

बुद्धस्य पादौ वन्दित्वा आलोक्य च परस्परं। सुवर्ण रूप्यवैदूर्य्य मुक्तायाः स्फटिकस्य च। समुसारा श्मगर्भस्य सप्तरत्न समाकुलान्। सहस्रारान् सुवर्णाश्च चतुरः संस्कृतान्नथान्। विश्वकर्म सुसंयुक्तान् ऋद्ध्या वैहाय संगमान्। ते तत्रा रूप्यराजानः प्रक्रान्ताः भूतमण्डलात्। पुष्पपूर्णा महीकृत्वा चूर्णैश्चापि हिरण-प्तयैः। यष्टीरावध्यहिगले सूत्रपाशा तथापि च। यक्षसेनापतीन्सर्वान् प्रेषयित्वा चतुर्दिश। आनेथ सर्वभूतानि यावन्तो स्मद्गतादिशि। महासाहश्र प्रमर्दनं संश्रोतुं

सूत्र मुत्तमं । ब्रह्मलोकात्समुदितं सर्वदेवैर्विनिर्मितं । महासाहस्र कायेन मर्दिता यक्षराक्षसा: ॥ ३३ ॥

श्रुत्वावाक्यं कुवेरस्य यक्षसेनापतिर्गतः । विक्रमन्तश्चतुर्दिक्षु घोरं घोषन्ति गुह्यकाः । अष्टाविंशच्च भूतानिग्रहा गंधर्व जामुने । पुरस्तिमे दिशोभागे भूतसंघाः श्रृणोतु मे । सर्वे ते सूत्रपाशेन पंच वन्धन पीडिताः । अष्टाविंशच्च भूतानि ग्रहाः कुम्भाण्ड जामुने । दक्षिणेस्मिन्दिशोभागे भूतसंघाः श्रृणोतु मे। सर्वेते सूत्रपाशेन पंचबन्धन पीडिताः। अष्टाविंशचच भूतानि भोन्ति नागग्रहामुने। पश्चिमेस्मिन्दि शोभागे भूतसंघाः श्रृणोतु मे । सर्वेते सूत्रपाशेन पंचबन्धन पीडिताः । अष्टाविंशच्च भूतानि भोन्ति यक्षग्रहा मुने । दिग्भागे उत्तरेचापि भूतसंघाः श्रृणोतु मे। सर्वेते सूत्रपाशेन पंचबन्धन पीडिताः । ज्येष्ठ पुत्रः 'कुवेर स्य संजयो नरवाहनः । पादमूलेतु तस्यैव यक्षाणां षष्ठि कोटयः । आकृष्टाः सूत्रपाशेन पञ्च वन्धन पीडिताः । महेश्वरो महादेवश्च तु वाहुर्महावल । पादमूलेतु तस्यैव यक्षाणां षष्ठि कोटयः । आकृष्टाः सूत्रपाशेन पंचवन्धन पीडिताः ॥ ३४ ॥

आगत्य सर्व भूतानि पर्वते भूतमर्दने । एषा उद्भाविता विद्या सर्वविद्या समाकरा। निष्ठूरं परूषंदण्डं सर्वबुर्द्धहिं भाषितं। एतगच्छाम शरणं सर्वगौतम मादरात्। अशाव्धेनानुवर्तेथ माचसर्वेनभेष्यथ ॥ ३५ ॥

ततोमुहूर्त मात्रेण भूतसंघाः समागताः। पर्वतेषु प्रपातेषु समुद्रेषु सरस्सु च। नदी प्रस्रवणोत्सेषु आवर्तेषु च ये स्थिताः। उद्यानेषु विमानेषु आरामेषु वनेषु च। चैत्यस्थाने ग्रामस्थाने वृक्षमूलेषु ये स्थिताः। नगरस्य प्रदेशेषु ग्रामेषु निगमेषु च। राजकुलेषु द्वारेषु विमानेषु च ये स्थिताः। मण्डपेषु श्मशानेषु तथा देवकुलेषु च। सीमासु शुष्कशालायां भून्यागारेषु जांगले। ऊर्ध्व हेष्टंच ये यक्षाः सर्वेदिक्षु विदिक्षु च। यक्षकोटि सहस्राणि विद्यापाशेन कार्षिताः। मृदंग वादितं कृत्वा

केचित् झुर्झुरवादिनः । वीणापणववेणूश्च वादयन्तो महावलाः । कृत्वा च वादित चित्र गांधर्व नाद्य मेवच ॥ ३६ ॥

इन्द्रः सोमश्च वरूणो भारद्वाजः प्रजापतिः । मातलिर्लोहिताक्षश्च हिमवन्तः सकर्णकः । चन्दनः कामश्रेष्ठी च मणिकण्ठो निकण्ठकः । प्रजागुरुर्यतीशश्च- मणिकण्ठी निकण्ठकः । चित्रसेनश्च गन्धर्वो नरराजो जिनर्षभः । तथा शिखि- नाम तुम्बुरूः सूर्यवर्चसः शैवलश्चासि पुत्रश्च विश्वामित्रो यशोधरः । आढवकः सुमनश्च शूचीकर्णोदरी मुखः । पञ्चालगण्डः सुमुखः ससैन्य बलवाहनः । देवानागाश्च गन्धर्वा असुरा यक्ष राक्षसाः । तृतीयकश्च उन्माद स्तथा चातुर्थको ज्वरयेच लोकान् हेठयन्ति प्रदुष्टायक्ष राक्षसाः । चतुर्दिक्षु समानाय पञ्चबन्धन पीडिताः । प्राञ्जलिकाः पुरस्थित्वा लोकनाथमभिव्रुवन ॥ ३७ ॥

नमस्ते पुरूष वीर नमस्ते पुरुषोत्तम प्राञ्जलिकरा नमस्यामि धर्मराज नमोस्तुते ॥ ३८ ॥

धावन्ति पुरतस्तेषां भूतायक्षा महाभयाः । चतुर्भूजा महाकाया वहुपादैक- पादकाः । चतुष्पदा द्विपादाश्च दुर्ध्वपादा अधोमुखाः । बहुकायैक शीर्षाश्च एककायाश्चतु:शिराः । बहुनेत्रार्द्ध कायाश्च एकाक्षाद्वा दशोदराः । खरोष्ट्रहस्ति शीर्षाश्च ऊर्ध्वहस्ता अधः शिराः । शस्त्रदन्ताः शस्त्रवाहूः शस्त्र पादाश्च राक्षसाः । ताम्रकेशा स्ताम्र दंतास्ताम्रा क्षास्ताम्रपाणयः । ताग्रमुद्‌गर पादाश्च ताम्रनासा अयोमुखाः । आदीप्त हस्तपादाश्च मनुष्यतनुमाश्रिताः । काणाः कुब्जास्तु गरूडा विकृताक्षा विजंभकाः । व्याडरूपा विरूपाश्च विकलास- कलोन्मुखाः । लम्बोष्ठा वक्रदन्ताश्च प्रदुष्टा भृकुटी मुखाः । स्थूलोदराः कुंभकर्ण लम्बकर्णा अकर्णकाः । दीर्घवाहू दीर्घकर्णादीर्घ नासाग्रपाणयः । शुष्ककाया दीर्घकाया दीर्घलोमाभ्यलं कृताः । पादभाराः कृशग्रीवा दुर्गन्धाः कलशोदराः मकरस्य यथा अंशोमुशल मुद्‌गरोदराः । ऊर्ध्वनेत्रा महाकर्णा

ऊर्ध्वकेशाः सुलोहिताः । स्थूलशीर्षा धनुर्ग्रीवाः कुब्जा कुंभोदराः कृशाः। ववर्षुर्वन्हि वर्षाणि मेरूमूर्ध्द्रि विचाल्पवैः। वृक्षपर्वतपाषाण भ्रमकूटसमद्युतिः। शंखभेरी मृदंगानां कुम्भाण्डा दुंदुभिस्वराः। प्रमुञ्चन्तिरवं भीमं महाकण्ठाः खरस्वराः। कालनीलकपीताश्च हरिपिंगल पिंगलाः। गुह्यकाः सर्वदुष्टानामालये पुरताः स्थिताः। ग्रसन्तेमानुषं लोक नरनारी तथेतरान्। उत्कृत्यमां संरूधिरं मेदो मज्जास्तथापरे। सूचिरोमासिकेशाश्च रक्त लोहित म्रक्षिताः। भक्षमाणाः प्रधावन्ति कुणपंसंप्रगृह्यवै। तीक्ष्णदन्ता रक्ता हस्ता ओष्ठम्रक्षित लोहिताः। अर्द्धवादितगात्रैश्च कृत्वा हस्तौ सुपूरितौ। वुक्कां हृदयजत्रूणि जघनं भक्षमाणकाः। कललाहस्त पादेभ्यो हरन्ते प्राणिनांवलं। अस्थि संकल कायेन उन्त्रासन्ति जनान्वहून्। गृहीत्वामानुषं चर्म लोहितेन प्रपूरितं विषेणोग्रेणसंसृष्टं विक्षिप्तन्ति दिशोदशः। नगराणां प्रदेशेषु विक्षियन्त कुलाकुलं। वातंपित्तं च श्लेष्माणं क्षोभयन्ति चतुर्दिशं। ईतिसंतिष्ठते तत्र राजपीडामहाभयाः। सर्वेसमागतास्तेपि विद्यापाशेन कर्षिताः। नमस्ते पुरूषोवीर नमस्ते पुरूषोत्तम। नमस्यामि प्राञ्जलिकरा धर्मराज नमोस्तुते॥ ३९॥

चरन्तिनगरंग्राम्यं राष्ट्रं राजकुले च। यक्षा ओजोहरा घीराः कृशाङ्गा रूधिराशिनः। महाकाया महाभीमा महाबला महा स्वराः। दशग्रीवाः सहस्राक्षा महाग्रासा महामुखाः। महतापरिवारेण शस्त्रहस्ताः सुभैरवाः। असिचर्म गृहीताश्च उल्का हस्ताश्चतुर्भुजाः। दण्डहस्ताः शस्त्रहस्ताः शूलिनो वज्रपाणिनः। उच्चा सन्ति दिशः सर्वा युद्धं कृत्वा सुदारूणं। प्रसन्ना गुह्यकाः सर्वेदुष्टा यक्षालये-स्थिताः। ग्रसन्ते मानुषे लोके नरनारी स्तथेदरान्। उष्णैर्मांसैश्च रूधिरैर्भ्रान्ताङ्गाः कामरूपि॥ ४०॥

सिंहव्याघ्रादिमहिष खरोष्ट्रांश्च स्वरूपिणः। ऋक्षद्वीपिबृक न्यंकु श्रृगालैड़ विडालकैः। रूपैराखुंकडपिप्रख्यैः खद्गी शूकरना कुलैः। मत्स्यकच्छपरूपैश्च अपरैः काकको किलैः। उलूक गृद्धश्येनादि तथातिमितिमिंगिलैः। मायरैर्हंसका

पोतै रूपैः क्रोश्चविहंगमैः । केचित्कुक्कुटरूपेण यक्षाः पश्यन्ति मानुषान् । सुपर्णपंक्षि वेषेण संत्रासन्ति जनान्वहून् । केषांचिन्मानुषं शीर्ष शरीरं खर-कुक्कुटं । अन्यानभि द्रवन्तोन्ये दृश्यन्ते विकलाशयाः । विलग्नाः कामपरमा अंत्रमालाव गुण्ठिताः । प्रहरन्ति त्रिश्शूलेन पीडां कुर्वन्ति प्राणिनां । मुञ्चन्ति दारूण श्वासं संत्रासन्ति इमाः प्रजाः । विचित्र रूपा दृश्यन्ते यावनी प्राणसन्ततिः । गृहीत पर्वताश्चान्ये असिचक्रधराः परे । संख्याशतसहस्राणां मुखरादण्ड तर्जिताः । उत्पाटिताक्षा विमुखाः खण्डदन्ताश्च राक्षसाः । छिन्नना साश्छिन्न कर्णा श्छिन्न जिव्हा बलीमुखाः । संछिन्न हस्तपादाश्च छिन्न शीर्षाश्च राक्षसाः । प्रेक्षन्ते चावतारंहि ओजो हिंसन्ति किल्विषाः । मानुषाणां शरीरेषु ससूक्ष्मो दृश्यते ग्रहः । रोमान्तरेषु मर्मेषु तथाव्रण मुखेषुच । सर्वे समागतास्तेपि विद्यापाशेन कर्षिताः । नमस्ते पुरूषवीर नमस्ते पुरूषोत्तम । नमस्यामोञ्जलिकरा धर्मराज नमोस्तुते ॥ ४१ ॥

सुमेरौगिरि राजे च चक्रवाडे तथैवच । गृध्रकूटे इषाधारे हिमवद् गंधमादने । पाण्डवै चित्रकूटे च नारदे पर्वतद्वये । श्रीपर्वतस्य मूर्द्धस्या तुंगेयेतु समुद्भवाः । या देवता तत्रधस्ता ऋषयश्च समाश्रिताः । वभूवुस्तेपि चोद्विग्नना आयासो त्रस्तमानसाः। देवकोटिसहस्राणि देवकोटिशतानि च । देवकन्या महाभागा अंजलिं संप्रगृत्यवै । वेमचित्री च राहुश्च प्रल्हादश्च समागताः । भृत्यकोटी सहस्रैस्तु भृत्यकोटी शतैरपि । कन्यास्तेषां मृद्धिमत्यो वध्वा दशनखाञ्जलिं । सागरः सुप्रतिष्ठ नाग राजो मनस्यपि । नागेशोऽनवतप्तश्च उभौ नन्दोपनन्दकौ । वक्षुर्नन्दो वज्रमति गंगा सिंधुरश्च सागरः । सुपर्णी पक्षिराजश्च सागरं क्षोभयन्ति च । नागकोटि सहस्रेभि नागकोटी शतैस्तथा । कन्यास्तेषां महाभागा अञ्जलिं संप्रगृत्यवै । रविचन्द्रावुभौवापि नक्षत्र परिवारितौ ॥ ४२ ॥

सुवर्णः पुष्पगन्धेषु मगधेषु च भेषकः । कर्मणिभरूकक्षेषु कोशलेषु प्रपुण्डकः । सूचीरोमा च सहृयेषु मल्लेषु च यशोधरः । विभीषणस्तु पांचाले लोहिताश्च

कुंभोदरश्च वंशेषु सूरदेषु अश्वजे। पिंगलश्च अवन्तेषु कपिताक्षश्च वैदिशि। महाजनपदाश्चैते उक्ता च दीर्घिलः। प्रमदर्नस्तु गान्धारे सूर्य्यमित्रश्च कम्वुषु। कपिलः सुदर्शनो यक्षाश्चतुर्दशः। वज्रपाणिर्महायक्षो धर्मपालः प्रपुण्डरः। विष्णुः पिण्डोलः कलशोदरः। कुंभीरः सात्यकिश्चापि पांचिकश्च जिनर्षभः। महेश्वरो महायक्षश्चतुर्बाहूर्महाबलः। प्रमर्दनः शूरसेनो महानग्नो महाबलः। यमश्च यमदूतश्च मारश्चापि ससैन्यकः। हरिर्नाम्नायक्षसौ यक्षकोटी परिग्रहः। हारीतिच ससैन्यातु गिरिदारी च यक्षणी। भीमरूपा महातेजा हारीतिनाम विश्रुत्ता। चण्डा चण्डालिकाचैव पञ्चपुत्रशतैर्वृताः। आकोटा कर्कटी काली पदुमा पदुभावती। पुष्पदन्ती विशाखा च खरकर्णा च राक्षसी। चन्दनो विष्णुलश्चापि हरिः कपिल पिंगलाः। कुंजरो नाग दन्तश्च गिरिमित्रोग्र दंष्ट्रकः। राक्षसी भद्रदन्ता च व्रह्मिला विक्षुलास्तथा। यक्षोहालाहलश्चैव राक्षसश्च वितुंदकः। शूलेषु ते गृहीत्वा भगवांश्च मृगमानुषान्। भक्षयन्तश्च जीवन्तो धावन्तश्च दिशोदशः। प्रकम्पमानाधरणी शोषयन्तो वनस्पतीन्। संकोचयन्तः शिखरन्मर्दयन्ते इमाः प्रजाः। परस्परं हर्षयन्तो विद्याकृष्टाः समागताः। नमस्ते पुरूषोवीर नमस्ते पुरूषोत्तम्। नमस्यामः अञ्जलिकरा धर्मराज नमोस्तुते॥ ४३॥

तेषां समागतानां हि लोकनाथस्य चाग्रतः। ततो वैश्रवणो राजा लोकनाथमथाब्रवीत्। ममा स्त्युत्तर दिग्भागे राजधानी सुनिर्मिता। मनोरमाडकवती तेनाहमडकाधिपः। चिन्तिता सर्वदेवेहि राजधान्याडकाह्वया। समुच्छ्रितान्त प्राकाराः सर्वरत्न समाकुलाः। क्षोमकैर्योजन शतं समन्तात्संस्कृतं मया। क्षोमकैश्चैकमेकस्मिन्समन्ताद्दिक चतुष्टये। स्थिता वज्रधरा यक्षाः शस्त्र हस्ताः सुनिर्मिताः। राजधान्यास्तु तत्रैव कृतंद्वार चतुष्टयं। एकं स्वर्णमयं द्वारं द्वितीयं रत्नसंस्कृतम्। तृतीयं स्फटिकं द्वारं चतुर्थं मणिचित्रितं। अभ्यन्तरेतु नगरे उद्यानेवन पुष्पिते। विमानानि विचित्राणि सप्तरत्न मयानिवैः। नानारत्नमयावृक्षा नानापक्षि निकूजिताः। नानापुष्प सुसंछन्ना नानागंधानुलेपनाः। यक्षिणीनां विलासैश्च गीतावाद्यैरलंकृताः। अनुमिश्रियं त्वग्प्रांभूतानां तत्र

मण्डले। सर्वाकार वरोपेतास्तत्रमे परिचारिकाः। धर्मधरा धर्मकामा नच हिंसन्ति प्राणिनां। अन्नपानेन विकला करूणा स्त्वितरे प्रजाः। अधर्मचारी अधर्मकामास्तेऽपि हिंसन्ति प्राणीनां। उदारं परिमार्गन्तो विप्रेक्षन्ति चतुर्दिशं। नगर द्वारसंस्थाये उद्यानेषु वनेषुच। यक्षराक्षस भूतानां कोटीशत सहस्रकान्। सगर्णानानयिष्यामः सूत्र पाशेन कर्षिताः॥ ४४॥

चन्दनानां वनैश्छत्रं शातपुष्करणीचितं। मध्ये तद्राजधान्यास्तु धर्मराजा निवेशनं। समन्ता द्योजनंयावत्कूटागाराश्च निर्मिताः सुवर्णस्य भवेदेकोद्वितीयो रूप्यमेवच। वैडूर्यस्य तृतीयस्तु चतुर्थः स्फटिकः श्रुचिः। पंचमोरत्नमुक्तायाः षष्ठश्चैवास्मगर्भकः। सप्तमस्तुमुसारस्य सप्तरत्न कमष्टकः। नारीशत सहस्राणि एकैकस्मिं समागताः। चित्रैराभरणैरग्रैश्चित्रैर्वेशैरलंकृताः। विचित्र गीतवाद्यैश्च शिल्पस्थानेषु शिक्षिताः। इदृशेन प्रमोदेन उदग्रास्तुष्ट मानसाः। अत्राहं मधुपानेन कामैश्चात्यर्थमूर्छिताः। पर्षन्मे प्रपलायन्ती संत्रासन्ति दिशोदशः। स्त्रियश्च पुरूषश्चापिस्तथा दारकदारिकाः। गर्भस्था अपि नश्यन्ति तिर्यग्योनिगता अपि। नक्षत्र चन्द्र सूर्याश्च ग्रहाः पीडन्ति दारूणाः। शस्यं बीजं फल पुष्पं औषधंपान भोजनं। हरन्ति मानुष लक्ष्मी मुच्चाचांक रातिच। ये केचिद्दुःकृता लोके वैराः कलह विग्रहाः। दग्ध नष्टं हत भिन्न तत्सर्वं भूतजं स्मृतम्। औगुण्ठन्ति निगुण्ठन्ति पर्यस्यन्ति स्थिहन्ति च। उत्त्रासन्ति च सत्त्वानां विप्रेक्षन्ति द्विषन्ति च। दर्शन्ति पापकं स्वप्नं प्रसुप्तान् पीडयन्तिच। द्वारस्थाश्चाच्छतां कृत्वां प्रकाशन्ति ग्रसन्ति च। मित्र ज्ञाति स्वरूपाश्च दृश्यन्ते चालयन्ति च। विचित्र कन्यकारूपै दृश्यन्ते कामचारिणः। चन्द्ररूपेण दृश्यन्ते सूर्य नक्षत्र रूपिणः। वातोल्का शनिरूपेण दृश्यन्ते वायुपीडिताः। उल्काकलाप सदृशाः श्रृगाल स्वर भैरवाः। विक्रमन्तश्च दृश्यन्ते वृक्ष चैत्यालयेषु च। दिव्याः कुमाररूपेण ज्वलन्तः शकट स्वराः। सदा चित्राणि दर्शन्ति आलयेषु पथेषु च। गृहाणां नगराणां द्वारं मचन्ति ते ग्रहाः गृहित्वा जीवित कायं कुपथे त्रासियन्ति च। रोगान्विचित्रान्दर्शन्ति विचित्राणि च रूपाणिं विचित्राणि स्वराणिच।

व्याधिवैकाय संस्थितम् । विपरीतं च दर्शन्ति सर्वरोगेषु लक्षणं । यावति प्रकृतिर्लोके सर्वादर्शन्ति तेन्यथा । सर्वेसमागतास्तेपि विद्यापाशेन कर्षिता: । नमस्ते पुरूषो वीर नमस्ते पुरूषोत्तम: । नमस्यामोञ्जलिकरा धर्मराज नमोस्तुते ॥ ४५ ॥

वैश्रवणो महाराजा उत्थितोथ कृताञ्जलि: । चक्रांक चित्र चरण यष्टिकांचन-सन्निभ: । लोक प्रद्योतकरण लोकनाथ महामुने । चतु: षष्ठि सहस्राणि यक्षाणा-मनुचारिण: । निश्रिता ह्युत्तरभागं पीडयन्त्युत्तरांदिशं । तेषां दण्ड प्रणेष्यामि लोकनाथस्य संमुखं ॥ ४६ ॥

स्याद्यथेदं- खड्गे खड्गगर्भे विचक्षणे चक्र राजाने चन्दे चपले पाताले भीमपर्वते खराग्रे कुटिले कराग्रे एकाक्षि वर्गवति सारंगवति विचित्रवति चित्रकान्ति स्वस्यस्तु मम सपरिवारस्य सर्वसत्त्वानांच उत्तरस्यांदिशि स्वाहा। ब्रह्माचाप्यथ शकश्च लोकपाला महेश्वरा: । यक्षाधिपतय: सर्वे हारीति च सपुत्रिका । इमां पुष्पांश्च गन्धा च प्रतिगृण्हन्तु ममाहुतिम् । वीर्येण तेजसा तेषामैश्वर्येणवलेनच । निहता: सर्वरोगाश्च स्वस्त्यस्तु मम सपरिवारस्य सर्व-सत्त्वानांच सर्वभयोपद्रवोपसर्गेभ्य: स्वाहा । नमस्ते पुरूषोवीर नमस्ते पुरूषोत्तम: । नमस्यामोञ्चलिकरा धर्मराज नमोस्तुते ॥ ४७ ॥

धृतराष्ट्रो महाराज: सकृताञ्जलि रूत्थित: । फुल्लराशिरिवोत्फुल्ल कल-विंकरूत स्वर: । मारकोकिल निर्घोष मेघदुंदुभिगर्जित: । चतु: षष्ठि सहस्राणि गन्धर्व राक्षसा मुने । निश्रिता: पूर्व दिग्भागे पीडयन्ति पुरस्तिमान् । तेषां दण्ड प्रणेष्यामि लोकनाथस्य चाग्रत: ॥ ४८ ॥

स्याद्यथेदं । धरणि धारणि प्रध्वंसनि भजनि प्रभंजनि विधमणिकिंपुरूषे सकले सरथे सारवति शूलधरे शूलधारिण शुद्ध चरणे घोषवति साराग्रे शान्ति स्वस्त्यन्तु मम सपरिवारस्य सर्वसत्त्वानां च सर्वभयोपद्रवेभ्य: पूर्वस्यां दिशि

स्वाहा । ब्रह्माचाप्यथ शकश्च लोकपाला महेश्वराः । यक्षसेनापतयः सर्वे
हारीति च सपुत्रिका । इमाः पुष्पाश्च गन्धाश्च प्रतिगृण्हरस्तु ममार्हुनि । वीर्येण
तेजसा तेषामैश्वर्येणवलेन च ।

निहंताः सर्वरोगाश्च स्वस्त्यस्तु मम सपरिवारस्य सर्वसत्त्वानांच सर्वभयोपद्र-
वोंपसर्गोपसर्गोपायासेभ्यः स्वाहा । नमस्ते पुरूषो वीर नमस्ते पुरूषोत्तम ।
नमस्यामोञ्जलिकरा धर्मराज नमोस्तुते ॥ ४९ ॥

राजाविरूढकश्चापि प्राञ्जलिकस्तथोत्थितः । सर्वज्ञ सर्वदशीच सर्ववादि
प्रमर्दकः । सर्वसंशयछेत्ता च सर्वलोक विनायकः । चतुः षष्ठि सहस्राणि
कुम्भाण्डाः प्रेतपूतनाः । निश्राय दक्षिणां दिशां पीडयन्ति तदुद्भवाम् । तेषां
दण्ड प्रणेष्यामि लोकनाथस्य सन्मुखं ॥ ५० ॥

स्वाद्यथेदं-शान्ति सारवति कान्ति कारवति किंकसि किरति किरण्डि
किवण्डि धरणि धमनि भूमिधारणि हिमवति ज्योतिश्चरणे मोलाग्रि स्वस्त्यस्तु
ममसपरिवारस्य सर्वमसत्त्वानांच सर्वभयो पद्रवेभ्यः दक्षिणस्यां दिशि स्वाहा ।
ब्रह्माचाप्यथ शक्रश्च लोकपाला महेश्वराः ।

यक्षसेनाधिपतयः सर्वे हारीति च सुपुत्रिका । इमाः पुष्पाश्च गन्धाश्च
प्रतिगृण्हन्तु ममाहुतिम् । वीर्येण तेजसा तेषामैश्वर्येण बलेनच । निहताः सर्वरो-
गाश्च स्वस्त्यस्तु मम सपरिवारस्य । सर्वसत्त्वानां च सर्वभयोपद्रवेभ्यः स्वाहा ।
नमस्ते पुरूषोवीर नमस्ते पुरुषोत्तमः । नमस्यामोञ्जलिकरा धर्मराज नमो-
स्तुते ॥ ५१ ॥

विरूपाक्षो महाराजो गृहीतांमलि रूत्थितः । महामेघ महासिंह महामह
महोदधिः । महावादि महाशूर महासंग्राम मर्दकः । चतुःषष्ठी सहस्राणि नासौपणं
गुह्यकाः । निश्राय पश्चिम देशं पीडयन्ति तदुद्भवान् तेषां दण्डं प्रणेष्यामि
लोकनाथस्य सन्मुखम ॥ ५२ ॥

स्याद्यथेदं-धर्मि वराग्रे वलवलि वलिनि दिशांगे विवशि सागरे खरि कपिले चण्डालि विवरिणि वीराजने विधारणि वर्णवति विमति वर्णवति अचले स्वस्त्यस्तु मम सपरिवारस्य सर्वसत्त्वानां च पश्चिमायां दिशि स्वाहा। ब्रह्मा-चाप्यथ शक्रश्च लोकपाला महेश्वराः। यक्षाधिपतयः सर्वे हारीति च सपुत्रिका। इमाः पुष्पाश्च गन्धाश्च प्रतिगृण्हन्तु ममाहुतिम्। वीर्येण तेजसा तेषा मैश्वर्येण वलेन च। निहताः सर्वरोगाश्च स्वस्त्यस्तु मम सपरिवारस्य सर्वसत्त्वानां च सर्वभयोपद्रवेभ्यः स्वाहा। नमस्ते पुरूषोवीर नमस्ते पुरूषोत्तमः। नमस्याम्यञ्जलि करा धर्मराज नमोस्तुते। अथ ब्रह्मा महाब्रह्मा प्राञ्जलिकः समुत्थितः॥ ब्राह्मण स्नातक श्रुद्ध सर्ववेदेषु पारग। वैद्यराजजनानन्द सर्वलोक चिकित्सकः। ये यक्षा राक्षसाश्चैव। दग्विदिक्षु ब्यवस्थिताः। पाताल हेष्टमूर्ध्वद्ध आकाश निश्रिताग्रहा तेषां दण्डं प्रणिष्यामि लोकनाथस्य संमुखम्॥ ५३॥

स्याद्यथेदं-ब्रम्हे ब्रह्मघोषे ब्रह्मस्वरे वज्रे वज्रघोषे वज्रधरे स्थिरे सागरे अचले अरणे इषणे रणदे आरणादे सूरे वराग्र प्राप्ते सागरवति स्वस्त्यस्तु ममा सपरिवारस्य सर्वसत्त्वानांच दिग्विदिग्भ्यः स्वाहा। ब्रह्माचाप्यथ शक्रश्च लोक-पाला महर्द्धिकाः।

यक्ष सेनापतयः सर्वे हारीतिच सपुत्रिका। इमाः पुष्पाश्च गन्धाश्च प्रतिगृण्हन्तु ममाहुतिं। वीर्येण तेजसा तेषामैश्चशवर्येण वलेनच। निहताः सर्वरोगाश्च स्वस्त्यस्तु मम सपरिवारस्य।

सर्वसत्त्वानांच सर्वभयोपद्रवो-पसर्गेभ्यः स्वाहा। वातजाः पित्तजारोगाः श्लेष्मजाः सनिपातजाः। निहताः सर्वरोगाश्च स्वस्त्यस्तु ममा सपरिवारस्य। सर्वसत्त्वानां च सर्वभयोपद्रवोपसर्गेभ्यः स्वाहा॥ ५४॥

अथ भगवतः एतद भवन्नैक राजस्यार्थाय बुद्धा भगवतो लोक उत्पद्यन्ते। नैकनगर निगम जनपद ग्राम कुलानां यावन्नैक सत्त्वस्यार्थाय बुद्धा भगवतो लोके उत्पद्यन्ते। अपितु सदेवकस्य लोकस्यार्थाय समारकस्य सब्रह्मकस्य

सश्रमण ब्राह्मणिकायाः सदेवमानुषासुरायाः प्रजाया बुद्धो भगवतो लोक उत्पद्यन्ते ॥ ५५ ॥

तत्कस्य हेतोः। यस्यां दिशि बुद्धा भगवन्तो विहरन्ति न तत्र मनुष्यामनुष्यान् विहेठयितव्यान्मन्यन्ते। यन्वहं येन वैशालीं महानगरी तेनोपसंक्रामेयं। एवं मया वैशाल्यां महाजनकायस्यार्थ कृतो भविष्यति बुद्ध कार्यं च ॥ ५६ ॥

अथ खलु भगवान् पूर्वान्हकालसमये निवाल्य पात्र चीवरमादाय सार्धमर्द्धत्रयोदशभिर्भिक्षु शतैः गृध्दकूटात्पर्वतादवतीर्णः ॥ ५७ ॥

अथ व्रह्मा सहापतिः पंचमात्राणि दिव्यानि छत्रशतान्यादाय भगवतो दक्षिणेनोपनामितवान्। उपनाम्यच भगवन्तमेव विजयमानः स्थितो भूत्। शक्रोपि देवानामिन्द्रः पंचमात्राणि दिव्यादि छत्रशतान्यादाय भगवतो वामेनो पनामितवान्। उपनाम्य च भगवन्तमेव विजयमानः स्थितः। चत्वारोपि महा- राजा एकैको महाराजो दिव्यानि पञ्च पञ्चमात्राणि छत्रशतान्यादाय भगवतः पृष्ठत पृष्ठत उपनामितवन्तः। उपनाम्य च भगवन्तमेव विजयमानाः स्थिताः। महेश्वरोपि देवपुत्राष्टविंशतिश्च महायक्ष सेनापतयः। द्वात्रिंशच्च महायक्षसेनापतयो नग्ना हारीतिच सुपुत्रिका सपरिवाराणां श्रावणकानां प्रत्येकं दिव्यं छत्रमुपना- मितवती विजयन्ति स्थिताः। एवं रूप यशोलाभ सत्काराग्रप्राप्तो भगवान् सभिक्षु- संघोपि गृध्रकूटपर्वतादवतीर्य येन वैशाली महानगरी तेनोपसं क्रान्तः ॥ ५८ ॥

अद्राक्षुः खलु पुन वैंशालिकालिच्छवयो भगवन्तं दूरत एवागच्छन्तं प्रासादिक प्रसादनीयं शान्तेन्द्रियं शान्तमानसं दान्तेन्द्रियं दान्तमानसं परमोत्तम शमथ प्राप्तं गुप्तेन्द्रिय नागमिव सुदान्त न्हदमि गच्छं विप्रसन्नमनाविलं द्वात्रिंश महापुरूषलक्षणौः समलंकृत गात्रं समन्ता दशीतिभिश्चानु व्यञ्जनैः संकुसुमितं विचित्रं तथागतस्य शरीरं शालराजेव पुष्पिंतः सूर्योवादिवा प्रमुक्ता रश्मिजालो रात्रौचान्धकार

तमिस्रायां गिरि शिखरगतः प्रज्वलमिव महाग्निस्कन्धः । महानिव चामीक जलधरः । एवमेव भगवान् भासते तपते विरोचते सहदर्शना देव वैशालिक लिच्छवयो भगवतोन्तिके चित्त प्रसादयामासुः ॥ ५९ ॥

ते च प्रसन्नचित्ता येन मार्गेण भगवान् वैशाली महानगरी प्रविशति तं मा शोधयन्तिस्म । सिञ्चन्तिस्म सन्मार्जयन्तिस्म । पुष्पावकीर्णं च कुर्वन्तिस्म विचित्रपट्ट दाम घण्टा छत्र ध्वज पताकानां नानागन्धानि धूपितानि कृत्वा ये भगवांस्तेनोपसंक्रामतिस्म । उपसंक्रम्य भगवतः पादयोः शिराशि निपात-यन्तिस्म ॥ ६० ॥

अथ खलु भगवान् सहस्रार चक्र रूचिर विलिखित पद्मबिम्व गर्भ सुकुमारेण पूर्वं सुचरित लक्षणो पचित्तेन तरूणादित्य किरणातिरेक प्रभेण प्रसूत बहु-रश्मि शतनिर्मलेन करेण तेषां लिच्छवीनां शिरांसि परिमार्ज्योत्थाय समनुशास-यन्तिस्म ॥ ६१ ॥

माभैष्टमा भैष्टमार्षा एषोहमागतो युष्माकमेवानुकंपामुपादाय अनुत्तर ज्ञानमभिसंबुद्धास्मि सर्वसत्त्वानांच हितायसुखाय ॥ ६२ ॥

अथ खलु भगवान् वैशाली महानगरी प्रविश्य मध्यमे यामे इन्द्रकीलमवष्टम्य चतुर्दिशमवलोक्य सुवर्ण वर्णबाहुं प्रसार्योत्तरासंगं कृत्वा विचरित्वोवाच ॥ ६३ ॥

ये केचित्पश्चिमेकाले पश्चिमे समये सर्षप फल प्रमाणं तथागत शरीर धातुं पूजयिष्यन्ति । इमां महासाहश्र प्रमर्दनी विद्याराज्ञी सर्वग्रह प्रमोचनी अयं धर्म-पर्यायो गंगासिकता प्रख्यातानां तथागतानामर्हता सम्यक्सम्बुद्धानां बुद्धमुद्रां भिक्षु भिक्षुण्युपासकोपासिका उद्गृहीष्यन्ति धारयिष्यन्ति वाचयष्यन्ति पर्यवाप्स्यन्ति । तेषां सर्वे ईति भयोपद्रवो पसर्गोपायासाः कलि कलह वन्धन विग्रह मण्डन

विवादा अन्तशः पैशुन्य पापका अकुशला दुःख धर्मानातिक्रमिष्यति अजेयाश्च भविष्यन्ति सर्वविहेठिकेभ्यः ॥ ६४ ॥

एव मुक्ते व्रह्माणं सहापति भगवन्तमेतदवोचत् । कतमासा भगवन् महासाहस्रप्रमर्दनी नाम विद्याराज्ञी सर्वग्रहप्रमोचनीयं धर्मपर्याय गंगासिकता प्रख्याता तथागातानां मर्हतां सम्यक्संबुद्धानां बुद्ध मुद्रा ॥ ६५ ॥

एवमुक्ते भगवन् व्रम्हण सहापतिमेतदवोचत्। तेन हि त्वं व्राह्मन् श्रृणु साधु च सुष्ठु च मनसि कुरू भाषिष्यन्ते । एवं भदन्तेति व्रह्मा सहापति भगवतः प्रत्यश्रोषीत् भगवांस्तस्यैतदवोचत् ॥ ६६ ॥

स्याद्यथेदं- अचले मचले सारमचले प्रकृतिवर्णे प्रकृतिनिर्घोषे समन्तमुखे स्थिरे स्थावरे विद्युष्टे विद्युष्टशब्दे प्रसरणे सारंगमे सारवते सारंगवते विसारंगवते बले महाबले महानिर्भासे स्वाहा ॥ ६७ ॥

तत्रेदमुच्यते । कायतानुस्मृतिः । शमथ विपश्यने त्रयःसमाधयः । चत्वार कृद्धि पादाः । चत्वारि सम्यकप्रहाणानि । चत्वारि स्मृत्युपस्थानानि । चत्वारि ध्यानानि । चतुः आर्यसत्यानि । पंचेन्द्रियानि । पंचबलानि । षडनुस्मृतयः । सप्तवोध्यङ्गानि । आर्याष्टाङ्गो मार्गः । नवानुपूर्वविहारसमापत्तयः । दशतथागत बलानि । एकादश विमुक्तायतनानि । द्वादशांगप्रतीत्यसमुत्पादः । द्वादशाकार धर्मचक्रं । षोडशाकारा आनापानानुस्मृतिः । अष्टादशावेणिक बुद्धधर्माः । द्वाचत्वारिंशदक्षराणि । इयं सा महाब्राह्मण महासाहश्र प्रमर्दनी नाम महाविद्या-राज्ञी सर्वग्रहप्रमोचनीयं सूत्र गंगासिकता प्रख्यातानां तथागतानां बुद्धमुद्रा । बुद्धनिर्हारो धर्म निर्हारः संघनिर्हारः । इन्द्रनिहारः । लोकपालनिर्हारः । ईश्वर निर्हारः । सत्यनिर्हारः । मार्गनिर्हारः । प्रतीत्यसमुत्पादनिर्हारः । चन्द्रनिर्हारः । सूर्य्यनिहारः । ग्रहनक्षत्र निर्हारः ॥ ६८ ॥

स्याद्यथेदं- सार केशिनि विधरिणि वराग्रतारे आकर्षणि अमोघवते कालि कालि कलिवर्ति भरणि भरे कलक संखे प्रसन्नप्राप्ते स्तम्भने स्तम्भप्राप्ते वज्रधरे स्वाहा ॥ ६९ ॥

इमस्मिन् लोके पुरमस्मिन् या पुनः स्वर्गेषु वा रत्नवराणि सन्ति।
समास्तिनैवेह तथागतेन देवाति देवेन नरोत्तमेन।
तस्मादिदं रत्न वरं प्रणीतमेतेन सत्येन इहास्तु स्वस्ति ॥ १ ॥

क्षयो विरागोत्यमृतं असंस्कृत माज्ञायसौ शाक्यमुनिः प्रभावितः।
धर्मेण तेनसमोस्ति कश्चिदमृतेन शान्तेन असंस्कृतेन।
तस्मादिदं रत्नवरप्रणीत मेतेन सत्येन इहास्तु स्वस्ति ॥ २ ॥

यःश्रेष्टमिष्टं विधिवत्प्रकाशितं शास्ता सदानुत्तरयोगवाहकः।
समाधिना तेन समोनविद्यते वज्रोपमेना द्वय मार्ग दर्शिना।
तस्माविदं रत्नवर प्रणीत मेतेन सत्येन इहास्तु स्वस्ति ॥ ३ ॥

अष्टौ महापुंगव ये प्रशस्ताख्यातानि चत्वारि युगानि चैव।
ते दक्षिणीया सुगतेन गीता महर्षिणात्य प्रतिपुगवे न।
तेभ्यः प्रदानं भवते महाफलं वीजानि न्यस्तानि यथा सुक्षेत्रे।
इदं प्रणीतं वर संघरत्नमेतेन सत्येन इहास्तु स्वस्ति ॥ ४ ॥

ये सुप्रयुक्ता मनसा दृढेन उपसंक्रमी गौतम शासनं हि।
ते प्राप्ति प्राप्ता अमृतं विग्राह्य तमोनुदां निर्बृतिमाप्नुवन्ति।
इदं प्रणीतं वर संघरत्न मेतेन सत्येन इहास्तु स्वस्ति ॥ ५ ॥

सहप्रयोगादिह दर्शनस्य त्रयः प्रहीणा युगपत्त किलेशाः।
सत्काय दृष्टि विचिकित्सना च शीलव्रत
वर संघरत्न मेतेन सत्येन इहास्तु स्वस्ति ॥ ६ ॥

नजातु कुर्यान्त्रिविधं हि पापं कायेनवाचा मनसाथवापि ।
प्रच्छादनीयं सहसान कृत्वा तथान दृष्टि ग्रहणेन तेषाम् ।
इदंप्रणीतं वर संघरत्न मेतेन सत्यने इहास्तु स्वस्ति ॥ ७ ॥

यथेन्द्रकीलः पृथिवी प्रतिष्ठिताः श्चतुर्दिशं वायुरभि प्रकम्प्य ।
तथोपमा पुद्गल सन्ति संघो ये आर्यमार्गस्य वरस्य दर्शकाः ।
इदं प्रणीतं वर संघरत्न मेतेन सत्येन इहास्तु स्वस्ति ॥ ८ ॥

ये आर्य सत्यानि विभावयन्ति गम्भीर प्रज्ञेन सुदेशितानि ।
कायः प्रदानं च मनस्य कृत्वा न ते भयं अष्टमवाप्नुवन्ति ।
इदंप्रणीतं वर संघरत्न मेतेन सत्येन इहास्तु स्वस्ति ॥ ९ ॥

अर्चिर्यथा वायु वशाद्विनष्टा अस्तंगतानैवमुपैत्ति संख्या ।
तथैव संयोजन विप्रयुक्ता अदर्शनं यान्ति हि बुद्धपुत्राः ।
इदं प्रणीतं वर संघरत्न मेतेन सत्येन इहास्तु स्वस्ति ॥ १० ॥ (७०)

यत् जंगमस्था तथैव स्थावरास्ते सर्व सत्त्वा सुखिनो भवन्तु ।
शास्ता विराग्रं नरदेव पूज्यं बुद्धं नमःस्यामि यायातु स्वस्ति ॥

यत् जंगमस्था तथैब स्थांवरा तेसर्व सत्त्वा सुखिनो भवन्तु ।
शास्ता विराग्रं नरदेव पूज्यं धर्म नमःस्यामि यायातु स्वस्ति ॥

यत् जंगमस्था तथैव स्थावरा तेसर्व सत्त्वा सुखिनो भवन्तु ।
शास्ता विराग्रं नरदेव पूज्यं संघं नमःस्यामि यायातु स्वस्ति ॥

यानीह भूतानि समागतानि स्थितानि भूमांवय वान्तरीक्षे ।
कुर्वन्तु मैत्री सततं प्रजासु दिवा च रात्रौ च चरन्तु धर्म ॥

ये नैव सत्येन जिनो जितारिः ससत्य वादी रिपुतस्य नास्ति।
ते नैवै सत्येन इहास्तु स्वस्ति। मुच्यन्तु मम सपरिवारस्य
सर्वसत्त्वानां च सर्व महाभयानि स्वाहा ॥ ७१ ॥

स्याद्यथेदं–धिरि विधिरि वल निर्घोषे वलसारे सारवति प्रभूत प्राप्ते आरवे आरघोषे सारवति अच्युते वलवति शूलप्राप्ते सारंगमे सूर्यवरे सूर्य निर्घोषे स्वाहा ॥ ७२ ॥

इयं सा महाब्राह्मन् महासाहस्र प्रमर्दनी नाम महाविद्याराज्ञी सर्वग्रह प्रमोचनीयं गंगासिकता प्रख्यातानां तथागतानामर्हतांसम्यक्संबुद्धानां बुद्धमुद्राबुद्धपदासंघपदा इन्द्रपदा लोकपाल पदा पर्यष्टिपदा ईश्वरपदा महेश्वरपदा महर्षिपदा आयतिपदा अक्षिपदा हेतुपदा प्रदेशपदानिर्देशपदा ॥ ७३ ॥

अभिसंबुद्धाः सम्यक्संबुद्धैः प्रत्येकबुद्धैश्चा शासिताः श्रावकैश्चाधिष्ठिता ब्रह्मणा प्रशंसिता ईन्द्रेण संपुजिता लोकपालैर्नमस्कृता ईश्वरेण संपूजिताः सर्वदेवैर्वर्णिता योगाचारैरभिनन्दिताः पण्डितैः प्रशंसिताः ऋषिभिरलंकृता ब्रह्मभिरभिष्टता वेदकैश्चिन्तिताः स्नातकैः प्रहर्षिताश्चातुर्वर्णेन लोकेन गोचराः सर्वबुद्धानां निर्यातः। प्रत्येकबुद्धानां निर्यातः। श्रावकाणां विमुक्तिः ऋषिणामाश्रयः योगाचाराणा-माकरः। बोधिपक्षाणां धर्माणां प्रवाहनं संक्लेशानामुत्पातन मनुशय शल्यानां संदर्शन मार्यमार्गस्य विचरणं मोक्षद्वाराणां भेदनं सत्काय दृष्टिनां प्रपातनं मानपर्वतस्य सशोषणं संसार समुद्रस्य उच्चालनं संसार पतितानाम स्थितपर्वतानां छेदनी मारपाशस्य उत्रासनी मारपर्षदः उग्दिरणी मारदण्डि यस्य उत्तारणी क्लेश संग्रामात् प्रवेशनी निर्वाण नगरं निष्क्रामणी संसार गृहादिति ॥ ७४ ॥

स्याद्यथेदं– खदगे खद्गघोषे उपोधने सारथि प्रभेदे संकर्षणि प्रकर्षणि विकर्षणि विसाग्रवति शुद्धशाधनि वरूणवति वासवे विभूषणि विसंगमे पशुपति

पुष्पगर्भे स्वस्त्यस्तु मम सपरिवारस्य सर्वसत्त्वानां च सर्वभयोपद्रवोपायसिभ्यः स्वाहा ॥ ७५ ॥

इयं सा ब्रत्म महासाहस्र प्रमर्दनी नाम महाविद्याराज्ञी सर्वग्रहप्रमोचनीयं सूत्रं गंगासिकता प्रख्यातानां तथागताना मर्हता नाम्यक्संबुद्धानां बुद्धमुद्राय या मुद्रितः सदेवासुर लोके अनुत्तर निर्वाणपुरं प्रविष्टः। यस्य चार्थाय गंगासिकता प्रख्यै-रर्हद्भिः सम्यक्संबुद्धैः श्रावकैश्च पूर्वमभिसंबुध्दैः समयक्संबुद्धाः प्रत्येकबुद्धः श्रावक मातापितृ दक्षिणीय गुरू स्थानीयैः पर्युपासिता ब्रह्मचर्यं चीर्णं शीलं रक्षितं दानं दत्तं कृता पारमिता परिपूरिः साधिता च वोधिप्राप्ति पराजितो मारः ॥ ७६ ॥

अथ ब्रत्मा सहापतिः शक्रश्च देवानामिन्द्रश्चत्वारश्च महाराजा एकवागेक-मतैकस्वरा भगवन्तं नमस्यमानादुचुः -

अहो विद्या। महाविद्या महासाहस्र प्रमर्दनी।
आरक्षा सर्वबुद्धानां बुद्धमुद्रा चतुर्दिश।
मुद्रा वयं प्रदास्याम सूत्रे साहस्र प्रमर्दने।
त्रसन्ति सर्व भूतानि मुद्रयामुद्रिता यया।
ये प्रदुष्टा मनुष्याश्चा प्रसन्नाश्चात्र शासने।
तेषां दण्डं प्रणेष्यामि विद्या ब्रात्मण निर्मिता।
शक्रेणधारिता मूर्ध्ना लोकपालैश्च मुद्रिता ॥ ७७ ॥

स्याद्यथेदं- कलिंगे हारदे जुदये जयमते सिंहमते साराग्रप्राप्ते हंसगामिनि हुले मिहुले मिहुलु २ मिहुलुमे हहं ४ सूदनि वराग्रे हस्तिने चरति चण्डालि बलसैन्य चलाचले स्वाहा ॥ ७८ ॥

अस्यां खलु पुनर्महासाहस्र प्रमर्दन्यां विद्या राज्ञां भाष्यमाणाया मयं त्रिसाहस्र महासाहस्र लोक धातुः षद्विकारमकम्यत्प्राकस्यत्संप्राकम्यत्। चतुर्षुदिक्षुविदिक्षु

भूत सैन्यैर्निनादः। प्रकृष्टः घोषं च घोषयन्तिस्म। अहो दुःख महोकष्टं नष्टा भूतगणा वयं। विनष्टा भूतसंघाता वंशनीतास्मसर्वथा। अवशाः प्राणी भूतानां सर्वेषामद्यसम्वराः। ते च भूमौ निषीदन्ति संप्रद्यन्ति दुःखिताः॥ ७९॥

अथ भगवांस्तां भूमिं वज्रमयीमभिनिर्मियीते। ते च चतुर्दिशे प्रपलायन्ति। अथ चत्वारो महाराजा श्चतुर्दिशं प्रपलायन्ति। अथ चत्वारो महाराजा श्चतुर्दिशं महान्तमग्निज्वालास्कन्धम भिनिर्मितावन्ति। ते चाकाशं परिधावन्ति। अथ ब्रह्मा सहापतिरयोमयमाकाशमभि निर्मिमीते। ते च सप्तपाताल मात्रं वैहाय संपरिधावन्ति। अथ शक्रो देवानामिन्द्रोसिसर शक्तिकुन्ततोमर वृक्ष पर्वत बृष्टिरभि निर्भय प्रवर्षयति॥ ८०॥

तेन च समयेन समन्ततः सहायां लोकधातौ पंच यक्षसहस्राणि सन्निपतितानि विद्याशापहतानि ज्वरा वेशोन्मत्तानि विषीदन्ते भगवतः पादयोः शिरांसि निपात्या-वूवन्। सर्व सत्त्वहितानुकम्पी श्रमणो गौतमत्रायन्तुनः श्रमणो गौतमः॥ ८१॥

अथ खलु भगवांस्तान् गुह्यकान्मैत्र्यास्फरतिस्म। शिक्षापद ग्रहणं च कार-यामासः। या गतिर्मातृ घातीनां पितृघातीनां च यागतिः। अर्हतां घातिकस्यापि संघभेदेच यागतिः। संबुद्ध दुष्टचित्तेन लोहितोत्पादकस्यच। तांगतिं प्रति गच्छेम यदिमुद्रां क्षिपेमहि। सप्तधास्य स्फुटेन्मूर्द्धा अर्जकस्यै व मंजरी। संसृष्टा यक्ष-रोगेण चिवगात्रा भवे महि। महासाहस्र प्रमर्दनी सूत्र यदिदं जिन भाषितं। विद्याराज्ञी मतिक्रम्य वर्तेमस्वेच्छया वयम्॥ ८२॥

तेन च समयेन वैशाल्यां महानगर्या सर्वे ईति भयोपद्रवोपायासाः प्रति प्रस्रब्धाः। यक्ष राक्षस मनुष्यामनुष्याः स्वकस्वकं गोचरमतिक्रान्ता वैशालिका लिच्छव यश्च सर्वरोगव्याधिभ्यो विनिर्मुक्ताः सर्व सुख समर्पिता बुद्धे अवेत्य प्रसादेन समन्वागता वभूबुः। धर्मे संघे अवेत्य प्रसादेन समन्वागता वभूबुः॥ ८३॥

सतत समितं रत्नत्रय पूजाभिरता महोत्सवेन विहरन्तः। हंस शुक शारिका कोकिल मयूर चक्रवलि कुणाल जीव जीवक पंक्षिगणा मधुराणि कूजन्तिस्म। विगतकाय पीडाः साप्सरस इव किन्नराः। अघट्टितानि च रत्नबाद्य भाण्डानि रणन्तिस्म। भेरीशंख मृदंग पणव तुणव वीणावेणवश्च यथा स्थान स्थापिता एव वाद्यन्तिस्म। दाडिम विल्वामलक न्यग्रोधाश्च प्लक्ष कपि त्थोदुम्बर शाल–ताल वृक्षा नानागन्धान् प्रमुञ्चन्तिस्म। देवनागयक्षगन्धर्व शतसहस्रैश्च हीहीकारः प्रमुक्तः। अन्तरीक्षाच्च पुष्पवर्षमभि प्रवर्षित। अमानुषश्च गन्धोलोके प्रादुर्भूतः ॥ ८४ ॥

अथ चत्वारो महाराजाः प्राञ्जलयो भगवन्तमेतदवोचत्। यः इदं भगवन् महासाहस्र प्रमर्दनी नाम महासूत्रराजं सर्वग्रह प्रमोचनीयं बुद्धमुद्रा धर्मपर्यायं ये केचित् शिक्षापदं गृहीत्वा काषायधारी उदगृह्य धारयित्वा वाचयित्वा पर्यवाप्य लिखित्वा श्रद्धयित्वा धारयिष्यन्ति। तस्य सर्व इति भयो पद्रवोपायासा वैर कलिकलह विग्रह भण्डन वन्धन विवादाः यावत्पैशून्य पापका अकुशला दुःख धर्मानातिक्रमिष्यन्ति। अजेयाश्च भविष्यन्ति सर्वविहेठकेभ्यः ॥ ८५ ॥

तेन राष्ट्रस्य सीमां वन्धयितु कामेन सुस्नातेन त्रिशुल्क भोजन भुक्तेन पंचामिष परिवर्जितेन सर्वमानुष्य शिक्षापद परिगृहीतेन सर्वसत्त्व समचित्तेन सुभूषितेन च वस्त्राभरण युक्तेन ग्रामनगर निगम श्रृङ्गाटक कुलान्यपगत शर्कर–कूटानि कृत्वा मध्यमायां राजधान्यां पुष्पावकीर्णा धरणिं कृत्वा नाना गन्धै प्रपूरयितव्याः। चतुर्दिशं चतस्रः कन्यकाः सुस्नातसुभूषिताः शस्त्रहस्ताः स्थापयितव्याः। चत्वारो घटा श्चत्वारि रत्न भाजनानि गन्धोदक पुष्पफल परिपूर्णानि कृत्वा स्थापयितव्यानि। पूर्वान्हकाल समये उद्गते सहस्र किरणे विद्या परिवर्त्तयितव्याः।

परषष्टिकरासूत्रं कर्तयितव्यं लिखित्वा चीरिकायां मूर्ध्नि महाचैत्यषु महावृक्षेषु महाध्वजेषु स्थापयितव्यां। नानापुष्पै र्नानाधूपै र्नानागन्धैश्च पक्ष मात्रं पूजा–

कर्तव्याः । दिवसेचैकवारं विद्या आवर्तयितव्याः । एवंराष्ट्रः परिमोचनीयो भविष्यति । एवं ग्रामनगर निगमजनपद राष्ट्र राजधानी विहार देवकुल क्षेत्रशाला वृक्षफल हरितारामगोशाला पशुशाला अपगत शर्कराः कृत्वा खदिर-वद रागिनं प्रज्वाल्य पुष्पावकीर्णा धारणि कृत्वा द्वारशाला शोभेन यथाविधि नानागन्ध सुधूपितं कृत्वा सर्व वीजानि सर्पिषा भक्षयित्वा चतुर्दिशं वीप्रक्षप्तव्यानि अग्नौच प्रक्षेप्तव्यानि नानारंगाणि सूत्राणि द्वारे वन्धनीयानि। तिर्यगयो निगतानि निष्कास्य पुनः प्रवेशयितव्यानि विद्या चावर्तयितव्या । लिखित्वा ग्रन्थयित्वा चोर्द्धमुच्छ्राय पूजनीया ॥ ८६ ॥

ग्लानस्य पुरतो बुद्धप्रतिविम्बं वा बुद्ध शरीरं वा समुद्गते वा पीठे वा मंचे वावरोप्य ब्रह्म प्रति विम्वं वा शक्रप्रतिविम्बं वा चतुर्महाराजप्रतिविम्बं वा चतस्रो मुद्राः कृत्वा स्थापयितव्या । नानापुष्पैर्नानाधूपैर्नानागन्धैः । ब्रह्मशक्र चतुर्महाराज महेश्वर यक्षसेनापति यक्षमहानग्ना हारितीनां च नाम्नात्रयाणां रत्नानां पूजा कर्तव्या ।

तेषां वलेनैश्वर्याधिपतयेन स्वस्त्यस्तु मम सपरिवारस्य सर्वसत्त्वानां च रक्षांकरोमि गुप्तिं परित्राणं परिग्रहं परिपालनं मुच्यन्तु सर्वग्लानान् सर्व ब्याधिभ्यः ॥ ८७ ॥

ग्लानस्व चान्नपान भैषज्यमुपनामतेयतां विद्या आवर्तयितव्या। बुद्धबोधौ तु संबुद्धे लोकपालै श्चतुर्दिशः। भाजनानि समानीय चत्वारि सुगतायवै। दत्तानि निर्मित्त श्चैको मुनिनाभाजनोत्तमः। गृहीतं पाणिनाशास्त्रा भैषज्यममृतोत्तमं। एतेन सत्यवाक्येन अमृतं भवतु औषधम् ॥ ८८ ॥

हारीती च महादेवी गृत्यपथ्यं तथाशुभं। शास्त्रे दत्तवती दिव्यं भैषज्यममृतो-पमं । एतेन सत्यवाक्येन आतुरस्य रूजापहं । सर्वामयहरंचापि भवत्वमृत-मौषधम् ॥ ८९ ॥

विपश्यि बुद्ध तेजेन शिखिनश्च बलेन च। विश्वभू सत्यवाक्येन क्रकुच्छन्द समाधिना। कनकारब्यस्य ज्ञानेन ऋध्यावै काश्यपस्य च। शाक्यसिंहस्य वीर्येण भवत्वमृतमौषधं। कृत्वापूर्व मुखंग्लानं भैषज्यमुपनामयेत्। इमां पाणि तले विद्यां तस्मिन्काले उदाहरत्॥ ९०॥

स्याद्यथेद- खटे विखटे विचले विलम्वे बले बलवति चन्द्रे चरणे अमृत निर्घोषे स्वाहा॥ ९१॥

वातजाः पित्तजा रागा श्लेष्मजाः सन्निपातजाः। निहताः सर्वरोगा श्च स्वस्त्यस्तु मम सपरिवारस्य सर्वसत्त्वानां च सर्वदा सर्वभयेभ्यः स्वाहा॥ ९२॥

सर्व काखोर्द वेताड सप्रयुक्तेषु कर्मसूत्रेण पुरुषेण स्त्रिया वा सुभुसिर्ते अहो-रात्रोपवासे तेन सुस्नातेन सुभूषितेन पुष्पावकीर्णा नानागन्धप्रधूपितां च धरणिं-कृत्वा उभय धातुं खदिरवदराग्निं प्रज्वाल्य सर्ववीजानि चतुर्दिशं प्रक्षेप्तव्यानि अग्नौ च प्रक्षेप्तव्यानि। नाना रंगाणि सूत्राणि शस्त्रेषु वा शुलेषु वा कुन्तेषु वा काण्डेषु वा ग्रन्थयित्वा वन्धनीयानि सर्वमूलानि सर्वपुष्पाणि नानागन्धोदकं कृत्वा महति कुण्डे प्रक्षेप्तव्यानि यस्य काखोर्द कृतं भवति। तस्य सूत्रकमावध्यकुण्डे धिष्ठापनीयं। शस्त्रेण तत्सूत्रं छित्वाग्नौ प्रक्षेप्तव्यमिदं च महासाहस्रप्रमर्दनी सूत्रमुदाहर्तव्यम्॥ ९३॥

बुद्धाः प्रत्येकबुद्धाश्च बुद्धानां श्रावकाश्चये। ब्रह्मेन्द्रो लोकपालाश्च यक्षसेनापतीश्वराः। तथा यक्षामहानग्ना हारीति च सपुत्रिका। वीर्येण तेजसा तेषामैश्वर्येण वलेन च॥ वेताड कर्म छिद्यन्तु॥ ९४॥

भिनन्ति वज्ररत्नानि वन्हिरिन्धन दाहकः। वातेन शोषिता मेघा भास्करेण वनस्पतिः॥ एतेन सत्यवाक्येन काखोर्द कर्म दहचतां। नाना गन्धै स्तथापुष्पै-विंधुताः सर्वपापकाः॥ ९५॥

तद्यथा ॥ हुमे २ कलवति खरवलि करलि खलले जुदग्रे जुंकि निजुहुनि जवले गलगे हरणि शावरि शान्ति प्रशान्ति स्वाहा । धावनि स्वाहा । गन्धर्वे सवहा । पलंगनि स्वाहा । सर्व काखोर्दकृत वेताड छेदनि स्वाहा । ईमैमंन्त्र पर्दर्मम सपरिवारस्य सर्वसत्त्वानां च काखोर्द वेताडौषधिमन्त्र विषयोगा: सर्वैदेवैश्छेदिताभेदिता पराजितास्वाहा ॥ ९६ ॥

गलगणधवै सर्पोदरोन्माद गन्डपिटक भगन्दर विषपित्तमन्यप्याधि मोचयितुकामेन सुस्नातेन सुभूषितेन भद्रपीठासने निषर्णेनेयं विद्या आवर्तयि तब्या ॥ तेजसा सर्वबुद्धानां प्रत्येकजिन तेजसा । अर्हतां चैववीर्येण सर्वेषां मंन्त्रधारिणां ॥ प्रज्ञया शारिपुत्रस्य मौगदल्यस्य च ऋद्धिया ॥ चक्षुषाचा निरुद्धस्य काश्यप च धूतैर्गुणैः । कौण्डिन्य पूर्वप्राप्त्यश्च आनन्दस्य श्रुतेनच मैत्र्यावैश्रवणश्चैव मैश्वर्येणत शक्रतोः ॥ विषयैर्लोकपालानां महेश्वर बलेन च । सेनापतीनां शौर्याण हारीत्याच समृद्धिया वीर्येण तेजसा तेषां विषमस्त्वं विषं सदा । तत्र मन्त्रपदा भोन्ति निर्विषा विषदूषणाः ॥ ९७ ॥

स्याद्यथेदं । हरिकेशि नकिले रहिले मण्डले करेके यूरे हसे हसे हसे वास पसे खरंगे मेरू गहने स्वाहा । मुक्तेस्वाहा । सुमुक्ते स्वाहा । हिले स्वाहा । मिले स्वाहा ॥ ९७.अ ॥

हतागण्डाः किलासा श्च वैसर्पाश्च विचर्चिकाः । पिटका लोहलिंगाश्च क च्छुर्भवतिसप्तमी ॥ ९८ ॥

रागद्वेषश्चमोहश्च एते लोके त्रयो विषाः । निर्विषो भगवान् वुद्धो बुद्धसत्य हतं विषं । रागद्वेषश्च मोहश्च एतेलोके त्रयोविषाः । निर्विषोभगवान्धर्मो धर्मसत्यं हतं विषम् । रागद्वेषश्च मोहश्च एतेलोके त्रयोविषाः । निर्विषो भगवान्शघः संघ सत्यं हतं विषम् ॥ ९९ ॥

विषस्य पृथिवीमाता विषस्यपृथिवी पिता। एतेन सत्यवाक्येन विषाः सर्वेषु निर्विषाः। मम सपरिवारस्य सर्वसत्त्वानांच भूमौसंक्रामतु विर्षपूर्णपात्रे वा संक्रामतु स्वाहा ॥ १०० ॥

अथात्र कलिकलह विग्रह विवाद परचक्र शत्रुन् पराजयितु कामेन पूर्वांच विहारे महाचैत्यपूजा कर्तव्याः। इयं च महासाहस्रप्रमर्दनी महाविद्याराज्ञी प्रवर्तयितव्या। बुद्धेन निर्जितामारा धर्मेणच अधर्मता। संघेन निर्जितात्तीर्थ्या इन्द्रेण असुराजिताः। असुरैश्चजितः सोमो वैनति येन सागरः। अग्निनाच जिताः काष्ठा उदके अग्निपराजितः। वातेन निर्जिता मेघा रत्नवज्रेण वाद्यते। सत्येन देवा स्तिष्ठन्ति सत्येन पृथिवीस्थिता। सत्य बुद्धश्च धर्मश्च सत्यं भवन्तु मामृषाम् ॥ १०१ ॥

स्याद्यथेदं। अमृते अमृत पुष्पेवहुफले निवारिणि सवार्थसाधनि अपराजिते धर धरणि गुत्यावर्ते गौतमे गुप्तमते जम्भनिस्वाहा। प्रजम्भनि स्वहा। वलप्रजम्भनि स्वाहा। जये स्वाहा। विजये स्वाहा। जय विजये स्वाहा। जिताः प्रत्यर्थिकाः सर्वे सर्वपापाः पराजिताः ॥ १०२ ॥

ततोथ शास्ता सर्वज्ञ इमा गाथामभाषत। अक्षोभ्यराजो अवलोकितेश्वरो अमिताभ नेमीरतना र्चिमेरूः। वज्रस्य चोनाम गृहीत्व सर्वदा नैवभयं भोतिन गच्छति तत्वतः। यः एष अष्टानमहा द्युतीनां नामानिकीर्तेय अनुग्रहार्थ। न तस्य अग्निर्न विषं नशस्त्रं क्रमतेस्यकाये कृतस पवित्रे। स चेदसौ आघतने उपस्थिते उत्क्षिप्त शस्त्रे वधकेन संमुखं। अनुस्मरन्तो अवलोकितेश्वरं ते खण्ड प्रपतेषु शस्त्राः। सचेदुद्गृहीतं हि भवेयु शस्त्र भंजित्वपाणि धरणिं पतेन। न तस्यकाये निपते यकिंचिदन्पत्र पूरिमेनयत्कृतं ॥ १०३ ॥

समग्र देवा इमां गाथां भाषिषु। नमोस्तुतेः बुद्ध अनन्त गोचराय नमोस्तुते सत्यप्रकाशकामुने। सत्यप्रतिष्ठाय प्रजा प्रमोचमे सर्वेच कार्याः सफला भवन्तु मे ॥ १०४ ॥

ततो ब्रह्मा महाब्रह्मा उत्थितो अथ कृताञ्जलिः । सुभाषिता इयं विद्यां महासाहस्र प्रमर्दनी। विद्यामहं प्रवक्ष्यामि दारकाणांहितंकरी। बुद्धवीरं नमस्यामिं धर्मराजं प्रभाकरम् । येन प्रथमतो विद्या जम्बुद्वीपे प्रकाशिता । धर्माय च विशिष्टाय संघायाय गणोत्तमे ॥ १०५ ॥

बुद्धस्य पादौ वन्दित्वा व्रह्मावचनमब्रवीत् । बुद्धाः प्रत्येकबुद्धाश्च बुद्धानां श्रावकाश्चये। ऋषयोलोकपालाश्च यावन्तो देवता अपि। इता मनुष्यलोकात्तु सर्व एते समुत्थिताः। सन्तोह राक्षसा घोरा गर्भभक्षा महामुने। शक्यान राज-भिद्रष्टुं नापि शक्याश्चदर्शितुं यासां पुत्रा नजायन्ते यासां गर्भो नतिष्ठति। नर नारी प्रयोगेण संप्रमुह्यन्ति इन्द्रियाः। पुत्रबीजं विनाशन्ति कललं वा सबुद्बुदं। निष्पन्नगर्भाया च स्त्रीजायते नविशल्पते । नामानि तेषामाख्यास्ये लोकनाथ श्रृणोहिमे ॥ १०६ ॥

मंजुको मृगराजश्च स्कन्दोपस्मारमुष्टिकाः। मातृकाजामिकाचैव कामिनी रेवती तथा । पूत ना मातृनन्दा च शकुनि कण्ठपाणिनी । मुखमण्डिका आलम्वा चरन्ते सर्वमेदिनी। एते ग्रहाः पंचदश दारकाणां भयंकराः। वक्ष्येहं लक्षण रूपं यथा गृन्हन्ति दारकान् ॥ १०७ ॥

मंजुकेन गृहीतस्य चक्षुषी परिवर्तते। मृगराज गृहीतस्य छर्दिर्भवतिदारूणाः। स्कन्धेनच गृहीतस्य स्कन्धौ चलति दारकः। अपस्मार गृहीतस्तु फेनंलालां च मूंचति । मुष्टिका प्रगृहीतस्य मुष्टिंवद्धान मुंचति । मातृका संगृहीतस्तु हसते स्तनते तथा। जामिका प्रगृहीतस्तु नाभिनन्दति संस्तनौ। कामिनी प्रगृहीतस्तु प्रसुप्त संप्ररोदति।

रेवति प्रगृहतस्तु जिव्हा दन्तैर्विखादति। पूतना प्रगृहीतस्तु काशते स्तनते तथा। मातृनन्दा गृहीतस्तु विचित्ररूपमादिशेत। शकुनि प्रगृहीतस्तु गन्धपूर्ति प्रवायते। कण्ठपाणि गृहीतस्य कण्ठसं परिरुध्यने। मुखमण्डी गृहीतस्य ज्वर्यते

व विरिच्यते। अलम्वा प्रगृहतिस्य हिक्का श्वासश्च जायते। तत्ररूपं समाख्यास्ये यथा त्रासन्ति दारकान्॥ १०८॥

मंजुको गवरूपेण मृगराजो मृगोयथा। स्कन्धःकुमाररूपेण अपस्मार-:श्रृगालवत्। मुष्टिका काकरूपेण छागरूपेण मातृका। जामिका अश्वरूपेण घोररूपेण कामिनी।

रेवती श्वानरूपेण शूकरूपेणपूतना मातृनन्दा विडालेन शकुनि यक्षरूपिणी। कण्ठपाणिः कौर्कूटेन औलूक्यं मुखमणिका अम्वाजन्तु रूपेण एता स्त्रासन्ति दारकान्। एताःपुत्रहरा घोरा दारकाणां भयंकरा॥ १०९॥

एतान् समानयिष्यामि सूत्रपाशेन कर्षितान्। चन्दनो नाम गन्धर्वो यक्षसेना-पतिर्महान्। तस्य लेखंच मुद्रां च दत्वादौत्येन योजयेत्। उग्रान् गच्छ समाने हि एतान् पंचदश ग्रहान्। तेन तत्क्षणमानीतां पंच बन्धन पीडिताः॥ ११०॥

ततो ब्रवीन् महाब्रह्मा लोकनाथं कृताञ्जलिः। एतानि तानि भूतानि वीजं नाशन्ति प्राणिनां। तेषां दण्डप्रणेष्यामि लोकनाथस्य सन्मुखं॥ १११॥

यस्या नजायते पुत्रो जातो वायश्च गृह्यतो। शिक्षा सद्धर्म चरणं अष्टमी चतुर्दशी। चैत्यं संपूजयित्वातु सुस्नात सुविभूषितं। संर्ष पालिप्त धरणी गन्धपुष्पसमाकुलं। पंचरंगिकसूत्रेण ग्रन्थोनां कारयेच्छतं। अर्धरात्रे स्थिते कालेमूर्ध्नि कृत्वातु सर्षपान। ब्रह्मनिर्मित मित्याहुर्ब्रह्मणाच प्रकल्पिता। यावद् द्वादशवर्षाणि दारकाणां हितं करी। यदिमां व्यतिक्रमेद् विद्यां सूत्रं ब्राह्मण निर्मितम्। सप्तधास्य स्फुटेन्मूर्द्धा अर्जकस्येव मञ्जरी॥ ११२॥

स्याद्यथेद॥ अंगे वंगे भगिनि भवने इनन्दि विनन्दि सरणि गिरि गवरि गरूणि सरूणि गले लोंचने अलहे रसने अलफे प्रकर्षणि स्वाहा॥ ११३॥

क्षिप्रं संतिष्ठतां गर्भः सम्यग् बर्धन्तु इन्द्रियाः। गर्भस्थाः सुखिनो भोन्तुमाच नश्यन्तु जातकाः। स्वस्थ्यं संतिष्ठतां गर्भः कालेनपरिमुच्यते। नानारंगानि सूत्राणि अक्षता गौरसर्षपाः। एषा रक्षा समाख्याता चिरं जीवन्तु दारकाः ॥ ११४ ॥

ततोथ शास्त्रा सर्वज्ञ इमां विद्यामुदाहरेत्। रक्षितो भवतु गर्भस्थःसुखमोदन्तु-दारका ॥ ११५ ॥

स्याद्यथेदं। बोधिबोधिमहाबोधि बोधानुमते फलले बहुले बहूफले शिक्षे शिक्षा सारवते सागरे दुरासदे दुरागमते शूल प्राप्ते शूलवते भगाभगे भगिनि निवारिणि स्वाहा ॥ ११६ ॥

ततो ग्रहाःपंचदश सर्वदा रूधिराशिनः। नमस्कृताञ्जलिकराः लोकनाथं सम-ब्रुवन्। यत्रेदं नगरे सूत्रं ग्रामे वा यदिवा गृहे। नात्र बाला मरिष्यन्ति यत्र तिष्ठेत्सुभा-षितम्। अनुवृत्या भविष्याम यथा तव महामुने। नमो भगवते बुद्धाय नमोब्रह्मणे सिद्धयन्तु द्रामिडा मन्त्र पदाः भवन्तु विद्यां तं ब्रह्मा नमस्यन्तु स्वाहा ॥ ११७ ॥

अथ वैश्रवणो महाराज एकांशमुत्तरासंगंकृत्वा दक्षिणंजानुमण्डल पृथिभ्यां प्रतिष्ठाप्य कृताञ्जलि भंगवत नमस्यमान उवाच। यःकश्चिद् भदन्त भगवन् श्रावक इमां महासाहस्रप्रमर्दनी सूत्रमुदगृह्णी याद् धारयेद् देशयेत्पर्यवाप्नुयात्। तेन वहुश्रुत्येनाभियोगःकरणीयः। चैत्य पूजापरेण भवितव्यं। अष्टम्यां चतुर्दश्यां पंचदश्यां च सित पक्षस्योदार चैत्यपूजां कृत्वाविद्यावर्तयितव्या ॥ ११८ ॥

तस्याष्टम्यां चतुर्दश्यां चतुर्णामहाराजानांपुरतःसमन्वाहरन्ति नामं चोद् घोषयन्ति। पचदश्यां स्वयमेव चत्वारो महाराजा समन्वाहरन्ति नाम चोद् घोषयन्ति। चत्वारो राजपुरूषा महाराजानां पुरतः। समन्वा हरन्तिनाम चोद् घोषयंन्ति। सर्वभूत हितानुकम्पी वतायं भगवतः श्रावको यः इमां महासाहस्रप्रमर्दनी

सूत्रमुद्गृह्णाति धारयति देशयति पर्यवाप्नोति । तस्य च भदन्त भगवन् वयं चत्वारो महाराजाश्चीवर पिण्डपात्रशयनासन ग्लानप्रत्ययभैषज्यपरिष्कारै रौत्सुक्यं करिष्यामः सत्कृतश्च भविष्यति। सर्वसत्त्वैर्गुरू कृतश्च मानितश्चपूजितश्च राज्ञां राजामात्यानां च भविष्यति । अन्यतीर्थिक श्रमण व्राह्मण परिव्राजकाणां पूज्यो मित्रामित्रमध्यगतोपि भविष्यति। तेन च श्राद्धेन कुलपुत्रेणवा कुलदुहित्रा वा शुचिनो भवितव्यं शुचिकायेन शुचिवस्त्राभरण शयनोपकरण विशेषेण नकुदेश लाभेन नकुदेश मित्रसंसर्गिणा नकुदेशवास संप्रयुक्तेन भवितव्यं ॥ ११९ ॥

यस्यभूतग्रहगृहीतस्य पुरत इदं महासाहश्र प्रमर्दनी सूत्रं श्रावयिष्यति, तस्य चत्वारौ महाराजा स्वयमेव रक्षावरण गुप्ति विधास्यन्ति। एवं महामहर्द्धिकं भदन्त भगवान् महासाहस्रप्रमर्दनीसूत्र यस्यापिगृहे एकवारमेकामपि रात्रिव समं वा कल्पयिष्यन्ति तस्यसंवतसरं या मनुष्यामनुष्यावतारं नलप्स्यन्ति, नमस्यनीयाश्च भविष्यन्ति सर्वभूतगणस्य। यःइदं महासाहस्र प्रमर्दनी सूत्रं धारयिष्यन्ति वाचयिष्यति तस्याकांक्षितं चत्वारो महाराजा सुखमुपदर्शयिष्यन्ति किमंग पुनरन्य इतरा यक्षराक्षसाः ॥ १२० ॥

तत्कस्यहेतोः। ये केचिल्लोकेविद्यां संविधास्यन्ति सत्त्वानां हिताय इमानिच मंत्रपदानि तेभ्यो वरप्रवर श्रेष्ठविशिष्टोत्तमानि गंभीरविपुलोत्तमानि अप्रमाणानि दुरावतरणान्य साधारणानि इयं धर्ममुद्रा ॥ १२१ ॥

अथेन्द्रः सहस्राक्षो देवराजः शचीपतिः । प्राञ्जलिस्थो नमस्कृत्वा लोकनाथं समव्रवीत् । सुभाषिता इयं विद्या सर्वलोकहितकरी । विद्यामहं प्रवक्ष्यामि मंत्रौषधि समायुताम् ॥ १२२ ॥

शिरीष पुष्पम पामार्गम गुरूकाटकाफलं शैलेयमेदमञ्जिष्ठा सूकरीमर्कटी-जया। परिवेल वाल वींरा सामकं तगरम्बुला। चन्दनावर्तकं कुष्टनखपत्रं कटं

वरा । प्रियंगु लोचना पृक्कासर्षपाश्च मनः शिलाः । त्वचं च कुँकुम हिंगु मन्त्रसंयुक्तवर्णकं । एषां च संयुतावर्तिः सर्वग्रहप्रमोचनी । सर्वभूतविकारिषु एषा नेत्रांजने स्मृता । गृहीता येन मुञ्चन्ति भूतवज्रांशनि शनैः । महावृक्षेषुलेप्तव्यं महाचैत्ये तथैवच । योहि पश्यति तत्स्थानं भूतेभ्यो नभयन्ततः । स्थानं न तत्र शूतानां नान्येषामहितैषिणां । भेरीशंखमृदंगाश्च पणवांश्चापि लेपयेत् । यावच्छ्रूयति शद्वोस्य त्रस्यन्ते भूतमण्डलाः । पक्षाणिलेपयेद्वापि पक्षिणां ग्राम चारिणां यत्रासौ सज्जतेपक्षी दिशंचापि दिगन्तरं । स्थानं न तत्र भूतानां नान्येषाम-हितैषिणां । उत्सहृद तडागेषु प्रक्षिपेद्यत्र तत्र वा । समन्ताद्योजन शतं स्वस्ति शान्ति र्भविष्यति । अपि शस्त्र निपेतेषु परचक्र समागमे । सर्व धर्मेषु लेप्तव्यं स्वस्तिनाचोत्तरिष्यति । गलगण्डेषु पार्श्वेषु वैशर्प्य पिटकेषु च । अहि दंष्ट्रे विषपीते क्षिप्रम् विमुच्यते । एतेन लेपयते् गात्रं सर्व काखोर्द छेदनं । विवादो-त्तारणं सिद्धं राजद्वार विमोचनं ।

असिद्धाःसिद्धिमाप्नोति ईश्वरत्वं मुनीश्वरः । अपुत्रो लभ्यते पुत्रमधनो लभते धनं । यावद्विद्याधर स्थानं मन्त्राण्येपतानि साधयेत् । तिर्य्यग्योनिगते चैव वृक्षमूलफलेषु च । विद्याधरस्य प्राज्ञस्य शान्तिकर्मकरं शुभं । तत्रमन्त्रपदान्यस्ति इन्द्रस्य वचनं यथा ॥ १२३ ॥

स्योद्यथेदं । अक्रमे विक्रमे घोषे भूतघोषे भूतंगमे देहिनि धधरे ३ दधिनि निखुमे खुखुमे खखख सारंगमे चन्द्रे चपले हलिमे हल हारिणि स्वाहा । सर्वपापेभ्यः स्वस्त्यस्तु मम सपरिवारस्य सर्व सत्त्वानां च सर्वदिग्विदिग्भ्यः स्वाहा । निहतानि सर्व पापानिस्वाहा ॥ १२४ ॥

